Sri Vani Vilas Sanskrit Series.

No. 10.

Subhashitanivi

OF

Sriman Vedanta Desika

WITH THE COMMENTARY

RATNAPETIKA

BY SRINIVASA SURI

EDITED BY

M. T. NARASIMHA AIYANGAR B.A., M.R.A.S.

Central College, Bangalore.

SRIRANGAM :

SRI VANI VILAS PRESS.

1908.

Copyright Registered.

~~IV. 7565~~
~~Inth 2464.2~~

HARVARD COLLEGE
MAR 5 1909
LIBRARY

Walcott fund

॥ श्रीः ॥

॥ सुभाषितनीवी ॥

श्रीमद्वेदान्तदेशिकविरचिता

श्रीनिवाससूरिकृतया

रत्नपेटिकाख्यया

व्याख्यया सहिता

श्रीमता म. तो. नरसिंहार्येण

संशोधिता ।



श्रीरङ्गनगरस्थ

श्रीवाणीविलासमुद्रायन्त्रालये

समुद्रिता ।

१९०८.

PREFACE.

The present edition of *Subhâshitanîvî* with the commentary *Ratnapetika* of Srinivâsa-sûri is based upon (1) a paper manuscript from the Government Oriental Manuscript Library, Madras, and (2) the Mysore Oriental Library copy kindly lent to me by the curator Mr. A. Mahâdeva Sastriar, B.A., M.R.A.S. Though these copies are traceable to different manuscripts and supplement each other to a great extent, still in some places both were found defective. Thus the Ratnapetika is not available for stanzas VIII—5, IX—8, 9, 10 & 11 and X—9 & 10 and to make up for this defect the commentary of Narakesari on these stanzas has been added at the end of the book. No pains have been spared to arrive at the correct reading wherever possible, but a few doubtful points in the commentary have been left untouched, as I did not like, on my own responsibility to modify them. Modern methods of punctuation have been introduced into the commentary, with a view to make it intelligible to the ordinary reader.

Of the two available commentaries, the *Ratna-petika* published here will be found to contain almost all the points needed for a critical study of the work.

I am indebted to my friends Vidvan Jayarama Venkatacharyar and Vidvan M. K. Tirunaraniengar for some valuable suggestions in determining the correct readings.

M. T. N.

Introduction.

THIS is a small poem on Morality by the Great Visishṭâdvaitic teacher, *Śrî Vedântâchârya*, who lived from 1268 to 1369 A.C. The work consists of 144 stanzas divided into 12 *paddhatis* or cantos of 12 stanzas each: * In the 1st five Cantos the author condemns the ways of wicked men, while in the next five the virtuous deeds of great men are extolled. The 11th treats of 'good poets' and the last describes the wisdom of 'discrimination.'

According to tradition, this work was composed by the author for the edification of Prince *Sarvajña(?) Singappa Nâyak* who sought moral and religious instruction at his hands. Pleased with the Prince's

* In an extra-verse at the end of the work, the author has indicated these numbers by the mnemonic forms भावुक (144) and प्रिय (12).

eagerness and devotion, the great Âchârya is said to have written three other works to the same end; *viz.* (1) तत्त्वसन्देश (2) रहस्यसन्देश and (3) रहस्यसन्देशविवरण. Further he is said to have addressed to the Prince the following stanza, which contains in a nutshell the essence of his religious and philosophical teachings:—

सत्त्वस्थान्निभृतं प्रसादय सतां वृत्तिं व्यवस्थापय
त्रस्य ब्रह्मविदागसस्तृणमिव त्रैवर्गिकान् भावय ।
नित्ये शेषिणि निक्षिपन्निजभरं सर्वंसहे श्रीसखे
धर्मं धारय चातकस्य कुशलिन् धाराधरैकान्तिनः ॥

Let us now see who this *Singappa Nâyak* might be

*Professor Śêshagiri Śâstriyar, in his Report on a search for Sanskrit and Tamil Manuscripts 1896—97(No. 1. p. 9), identifies this Prince with *Sarvajña Singama Nâyudu* or *Simha Bhûpâla* the author of Rasârnavasudhâkara, and says that he was one of the ancestors of the present Raja of Venkatagiri, and that he flourished about 1330 A.C. It is also stated there that *Nayinârâchârya* (son of Śrî Vêdântâchârya) went to his court and defeated the opponents of the Vaishṇava faith.

* I am indebted to Mr. R. Narasimhacharyar Avl. M. A., M.R.A.S. for this reference.

We have to examine how far this identification is correct.

Rao Bahadur K. Vireṣalingam Pantulu, while fixing the age of the poet *Śrînâtha)* in his treatise on the Telugu Poets, Part I*)*, has discussed the date of this author Sarvajña Śingama Nâyuḍu and has arrived at the conclusion that he was a contemporary of Praudha Devarâya of Vijayanagar (1422-1447). He says further that he was the 10th in descent from *Bhêtâḷa Nâyuḍu* or *Chêvi Reḍḍi*, the progenitor of the Venkatagiri line of Princes, and that his work on Poetics (Śingabhûpâlîya) was also known as *Chamatkâra-chandrikâ*. According to him, *Śrînâtha* was the court poet of *Vêmâ Reḍḍi* of Rajamundry, whose inscription at Bhimavaram is dated 1434 A.C. The same *Śrînâtha* is said to have attended the Court of *Sarvajña Śingama Nâyuḍu* and to have prayed to Sarasvati that he might also approve of the title *Kavi-sârvabhauma* conferred on him by other Rulers. Śrînâtha's brother-in-law, *Bammera-Potarâju*, the well known author of *Ândhra-Bhâgavata*, was the court poet of Sarvajña Śingama Nâyuḍu, who is said to have attempted to destroy that work on the poet's declining to dedicate it to him.

Again *Mallinâtha* the great commentator of the 15th century (See Bhandarkar's Preface to *Mâlatî-Mâ-*

dhava) is said to have attended the court of Sarvajña Singama Nâyudu.

Thus we see that the renowned author* of Rasârṇava-sudhâkara or Ṣingabhûpâliya could not have been a contemporary of Ṣri-Vêdântâchârya, who lived only up to 1369 A.C. Professor Ṣeshagiri Ṣâstriyar's identification in question is therefore untenable.


It now remains to be seen who might be the Prince, *Singappa Nâyak* referred to in the tradition. For this purpose it is necessary to examine the following pedigree of Simha-Bhûpâla as detailed in the introductory chapter of *Rasârṇavasudhâkara*:—

---

* This author is said to have written also a commentary on Sarngadeva's *Sangitaratnakara*. Professor Bhandarkar (in his Early History of the Dekkan, 1895, p. 112) says that this commentary is "attributed to a king of the name of Singa who is represented as a paramount sovereign of the Andhra circle," and adds that "this Singa appears in all likelihood to be Singhana" (the Yâdava king of Devagiri). I doubt very much the correctness of this surmise. The colophon at the end of *Rasârṇavasudhâkara* reads thus:-

इति श्रीमदान्ध्रमहीमण्डलाधीश्वर प्रतिगण्डभैरव श्रीयनपोतनरेन्द्रनन्दन भुजबलभीम श्रीशिङ्गभूपालविरचिते रसार्णवसुधाकरनाम्नि नाट्यालङ्कार-शास्त्रे—

VENKATAGIRI DYNASTY (RECHARLA-VAMSA):



In this list there is mention of a *Singa-Prabhu* who was the grandfather of the author of Rasârṇavasudhâkara. A comparative study of the above dynastic list with an account of the Rajamundry Reḍḍi rulers will enable us to see that this *Singa-Prabhu* was a contemporary of Śrî-Vedântâchârya. The following is the summary of the account of the Koṇḍavîḍu (Krishna District) and Rajamundry Reḍḍi Rulers as given by Mr. Vireṣalingam Pantulu:—

1. *Polayavêma Reḍḍi*—1328—1339 A.C. (Senâpati of Pratâparudra II of Orangal). Became independent in 1328, occupied *Vinukoṇḍa* and ruled over it.

2. *Anavema Reḍḍi*—(son of 1) 1340—1369 A.C. His capital was *Addanki* (near Nellore); conquered Rajamundry. Built *sopânavidhi* for Śrîśâila (near Pâtaḷa-Gangâ). Wrote a commentary in Sanskrit on the *Amaruka Kâvya*.

3. *Allaya-Vema Reḍḍi*—(brother of 2) 1370—1381 A.C.

4. *Annapota Reḍḍi*—(son of 2) fought with *Mâḍa Nâyaka* Venkatagiri and was killed in a battle during his father's life-time (before 1369).

5. *Kumâragiri Vemâ Reḍḍi*—(son of 4) 1382—1395 A.C. Presented Rajamundry to his sister's husband *Allâḍa-Bhûpati* of Panṭa-kulam.

6. *Allâḍa-Bhûpati*—(Brother-in-law of 5) Ruled over Rajamundry up to *Simhâdri* till 1415A.C.

7. *Vêmâ Reḍḍi* and *Virabhadra Reḍḍi*—(sons of 6) —Ruled jointly over Rajamundry. Vemâ Reḍḍi extended the kingdom up to the Chilka Lake; and was the Patron of *Srinâtha* (Telugu Poet). His inscription at *Bhimavaram* is dated 1434 A.C.

From this it is clear that *Mâdhava Nâyak* or *Mâḍa Nâyak* of Venkatagiri, (who killed Annapota Reḍḍi in a battle) lived about 1369 A.C., and that his father *Singa-prabhu*[¶] must therefore have been a contemporary of *Sri Vedântâchârya*.

¶ Tradition makes him माधवात्मज which may be a mistake for याचमात्मज. It is however uncertain whether the title *Sarvajna* is applicable to *this* Prince. In fact, one of the Mss. of *Râtnapetikâ* used by me, makes no mention of this title. Though we find no reference to this title even in the *Singabhupaliya* (Rasarnavasudhakara), still we know, from the various references in contemporary Telugu works, that the *author* was invariably known by that title. That it has been continued to the Rajas of Venkatagiri even to the present day, is evident from the title-page of Rasarnavasudhakara (Telugu Edition) published in Venkatagiri, 1895.

Further in the commentary *Ratnapeṭika*, we meet with the epithet राजमहेन्द्रनगरस्थित as applied to this Prince. If this be correct, we are led to suppose that Rajamundry was under the authority of the Venkatagiri Rajas\$ at the time of composition of the *Subhâshitanivi*. This poem cannot in that case be later than 1340 A.C., as the Reḍḍi rulers took possession of the country about that year. Considering, however, the style and matter of the work, I am inclined to place it between 1310 A.C. and 1320 A.C.

The poem (सुभाषितनीवी), small as it is, is a masterpiece of didactical composition, and deserves to become a common quotation. The author's main object here is to inculcate moral and philosophical ideas in one and the same stanza by paronomasia (श्लेष) or allegory (अन्यापदेश). The style is dignified and the ideas are sublime, though in one or two places the descriptions may not seem quite suited to the taste of a fastidious critic. The author is generally fond of the *Pâñchâli* style though there is a tendency at times towards the *Gauḍi*. The ease with which our poet introduces the reader to philosophical maxims is

\$ In the Rasarnavasudhakara it is said that their kingdom extended from the *Vindhya* to *Srisaila* (in Karnul), with *Rajachalam* as capital.

marvellous, and would be well nigh impossible in a less skilled writer. The versatile genius of the author which earned for him the title of *Sarvatantra-svatantra* is exhibited in a remarkable degree in his numerous productions covering almost every department of Sanskrit Literature. Out of the 120 works ascribed to him in all, a few important ones are noted below:—§

Kâvya यादवाभ्युदय, हंससन्देश; Drama सङ्कल्पसूर्योदय; Didactic Poem सुभाषितनीवी; Geography भूगोलनिर्णय; Silpa शिल्पार्थसार; Dharmasâstra हरिदिनतिलक; Prayoga यज्ञोपवीतप्रतिष्ठा; Mîmâmsâ सेश्वरमीमांसा, मीमांसापादुका; Stotra हयग्रीवस्तोत्र, दयाशतक, दशावतारस्तोत्र, न्यासदशक, न्यासविंशति, न्यासतिलक, पादुकासहस्र, यतिराजसप्तति, गरुडपञ्चाशत्; Prose stotra गरुडदण्डक, रघुवीरगद्य; Visishtadvaita Philosophy पाञ्चरात्ररक्षा, सच्चरित्ररक्षा, रहस्यरक्षा, गीतार्थसङ्ग्रहरक्षा, गीतातात्पर्यचन्द्रिका, न्यायसिद्धाञ्जन, न्यायपरिशुद्धि, तत्त्वमुक्ताकलाप, अधिकरणसारावली, शतदूषणी; (Tamil) Religious works रहस्यत्रयसार, रहस्यसन्देश. तत्त्वसन्देश; &c.

§ For the complete list and for a detailed account of the author's life, the reader is referred to the Tamil Guruparamparaprabhavam and to the learned introduction to the *Yadavabhyudaya* issued from this Press.

About the commentator *Srinivasasûri*, we learn that he was the son of Venkaṭâchârya (*Somayâjin*) of the *Sriṣaila* (Tirumaliyâr) community; and that he was the author of a work known as *Nayamâlika* (see p. 59.) He quotes copiously from *Nânârtharatnamâlâ* composed about 1385 A.C. He seems to have written some other works also.

Bangalore,
August 1908.

M. T. Narasimhiengar.

॥ श्रीः ॥

॥ विषयसूची ॥

		पृष्ठः.
१.	अनिपुणपद्धतिः	१
२	दुष्टपद्धतिः	१४
३.	खलपद्धतिः	२२
४.	दुर्वृत्तपद्धतिः	३१
५.	असेव्यपद्धतिः	४०
६.	महापुरुषपद्धतिः	४७
७.	समचित्तपद्धतिः	५६
८.	सदाश्रितपद्धतिः	६३
९.	नीतिमत्पद्धतिः	७०
१०.	धनधान्यपद्धतिः	७९
११.	सत्कविपद्धतिः	८७
१२.	परीक्षितपद्धतिः	९५

॥ श्रीः ॥

॥ सुभाषितनीवी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

अनिपुणपद्धतिः ॥

इह खलु भगवान् वेङ्कटनाथार्यः कवितार्किकसिंहः सर्वतन्त्रस्वतन्त्रः राजमहेन्द्रनगरस्थित(सर्वज्ञ)शिङ्गक्षमावल्लभेन एकलव्यन्यायेन शिष्येण विशिष्टश्रीवैष्णवधर्मविविदिषया श्रीरङ्गनगरस्थितस्य वेदान्तदेशिकपदेऽभिषिक्तस्य स्वस्य निकटं प्रति श्रीवैष्णवेषु प्रेषितेषु तदर्थं रहस्यसंदेशतत्त्वसंदेशौ श्लोकं च कंचित्—

'सत्त्वस्थान्निभृतं प्रसादय सतां वृत्तिं व्यवस्थापय
त्रस्य ब्रह्मविदागसस्तृणमिव त्रैवर्गिकान्भावय ।
नित्ये शेषिणि निक्षिपन्निजभरं सर्वंसहे श्रीसखे
धर्मं धारय चातकस्य कुशलिन् धाराधरैकान्तिनः ॥'

—इति विरचय्य स्वरूपशिक्षार्थं तद्व्याजेन लोकहितार्थं सामान्यविशेषधर्मप्रतिपादनपरं द्वादशद्वादशपद्यकद्वादशपद्धतिकं सुभाषितनीव्याख्यं नीतिप्रबन्धं प्रणिनाय। तत्रानिपुणपद्धतिर्दृप्तपद्धतिः खलपद्धतिर्दुर्वृत्तपद्धतिरसेव्यपद्धतिर्महापुरुषपद्धतिः समचित्तपद्धतिः सदाश्रितपद्धतिर्नीतिमत्पद्धतिर्धनधान्यपद्धतिःसत्कविपद्धतिः परीक्षितपद्धतिरिति क्रमः। दोषान्विधूय गुणाः प्रापणीया इति प्रथमं दोषपराः पद्धतयः प्रणीताः, तेष्वात्मोत्तारणनैपुण्याभावादनिपुणत्वं तस्य हेतुर्देहात्मादिविवेकाभावस्तदेवाज्ञानं ततो दृप्तता खलत्वं दुर्वृत्तता च, तेन सज्जनैरसेव्यत्वमिति परस्परसङ्गतिः। तथा चाज्ञानस्य (सर्व) दोषकारणत्वात्तदेवावश्यं परिहरणीयमिति बुद्ध्या अनिपुणपद्धतिः प्रथममारब्धा। तत्र मङ्गलश्लोकस्य दुर्जनेभ्यो ग्रन्थस्य रक्ष्यत्वपरश्लोकस्य च पद्धतिनियमितद्वादशश्लोक्यन्तर्गतत्वात्तयोरप्यनिपुणपरतां प्रतिपादयितुं तद्दोषकीर्तनम्। तत्रायं मङ्गलश्लोकः—

प्रथमसुजनाय पुंसे
मध्यमपि प्रथमदुर्जनाय नमः।
सर्वं हृतः कृतं यौ
सकृदुपकारापकाराभ्याम् ॥ १ ॥

प्रथमसुजनायेति ॥ प्रथमश्चासौ सुजनः परमपुरुषः, तस्मै नमः। प्रथमचरमजघन्यसमानमध्यमध्यमवीराश्चेति प्रथमशब्दस्यपूर्वनिपातः। स्वस्य दुर्जनत्वे उच्यमाने सर्वेषां स्वात्मनि दुर्जनत्वप्रतीतिर्भवत्विति मध्यमित्युक्तम्। परमपुरुषसमानधर्मत्वात् स्वस्यापि

नन्तव्यत्वमित्यभिप्रायेणाह सर्वं हत इति । यौ परमपुरुषोऽहं च सकृदुपकारापकाराभ्यां कृतं सर्वं हतः नाशयतः । हन हिंसागत्योरित्यस्माल्लटस्तसि तसो ङित्त्वादनुदात्तोपदेशेत्यादिना अनुनासिकलोपः । 'कथंचिदुपकारेण कृतेनैकेन तुष्यति । न स्मरत्यपकाराणां शतमप्यात्मवत्तया ॥' इति दासेन क्रियमाणशरणागतिमपि भगवतो निरुपाधिककारुण्यतया रक्षापेक्षाप्रतीक्षत्वेन स्वस्योपकारं मत्वा सर्वं पापजातं नाशयतीत्यर्थः । आत्मा तु हितवृत्तिमाचरेत्युपदेशमेव स्वस्यापकारं मत्वा भगवत्कृतोपकारं अस्मरन् तस्मै द्रुह्यति; तदेव सर्वकृतनाशनम् । 'प्रथितं पातकिवर्गे कृतघ्न एकोऽपि कृत्स्नमतिशेते । तमिमं क्रियमाणघ्नस्तमपि दुरात्मा करिष्यमाणघ्नः ॥' इति प्रमाणमजानन् स्वोपकर्तरि अनिष्टमाचरति दुर्जनस्वभाव एषोऽज्ञ इति पद्धत्यन्वयः । अनेन निपुणेन स्वोपकारिणि नाहितमाचरणीयमिति धर्मबोधः; 'उपकारिणि यः साधुः साधुत्वे तस्य को गुणः । अपकारिणि यः साधुः स साधुरिति कथ्यते ॥' इति अपकारिण्यपि हिताचरणस्यैव विधानात्, 'कृतघ्ने नास्ति निष्कृतिः' इति महादोषस्मरणाच्च । अत्र 'नमः पतनशीलाय खलाय मुसलाय च । कुर्वाते स्वमुखेनैव बहुधान्योपखण्डनम् ॥' इतिवत् परमपुरुषसमानधर्मतया नन्तव्यत्वोक्त्या स्तुत्या निन्दाभिव्यक्तिरिति व्याजस्तुत्यलङ्कारः; तदङ्गभगवत्तुल्यत्वकीर्तनात्तुल्ययोगितेत्यनयोरङ्गाङ्गिभावसंकरः ॥

करिष्यमाणस्य ग्रन्थस्य नामनिर्देशपूर्वकं काव्यार्थचोरेभ्यो रक्ष्यत्वमाशास्ते—

प्रमितिपरिष्कृतमुद्रा
सहृदयहृदये समर्पिता कविभिः ।
भवति सुभाषितनीवी
पटुगुणचोरैरहार्यार्था ॥ २ ॥

प्रमितीति ॥ प्रमित्या यथार्थबुद्ध्या परिष्कृता मुद्रा यस्याः सा तथोक्ता, स्वाधीनप्रमितिमतामेव ग्राह्यार्थत्वमिति प्रमित्यां मुद्रात्वरूपणं ; धनपक्षे इयदत्र धनं निक्षिप्तमिति प्रत्ययाय परिष्कृतमुद्रा भवतीत्यर्थः । कविभिः सूरिभिर्वणिग्भिश्च, सहृदयहृदये सारग्राहिप्रामाणिकहृदये, समर्पिता निवेदिता, सुभाषितानां नीतिवाक्यानां नीवी मूलधनं, इयं कृतिः । यथा मूलधनेन धनवृद्धिः संपाद्यते, तथाऽनया बुद्धिमद्भिः सुभाषितवृद्धिः संपाद्यत इति मूलधनत्वरूपणम् । पटवो ये गुणाः काव्योपस्कारकाः शब्दार्थविशेषास्तेषां चोरैः ; अन्यत्र, पटवो गुणाः भित्तिभेदनचातुर्यादिगुणा येषां तैस्तथोक्तैः, चोरैरपहर्तृभिः, अहार्यो ग्रहीतुमशक्योऽर्थोऽभिधेयं धनं च यस्याः सा तथोक्ता भवति, कुकविदुर्ग्रहार्था भवतीति भावः । अनेन सत्कविभिः स्वस्वप्रणीतसुभाषितग्रन्था रक्षणीया इति प्रतीतिः फलम् , कुकवयः परोच्छिष्टोपजीविनो बहिष्कार्या इति निन्दाप्रतीतिश्च । स्वकीयापूर्वशब्दार्थस्फुरणाभावे सति परकीयशब्दार्थान् गृहीत्वा अस्माभिः कृतमिति प्रकाशनं सरस्वतीचौर्यरूपं आत्मनाशकरमित्यजानतामनिपुणपद्धत्यन्तःप्रवेशः । 'बद्धवैराणि भूतानि' इति न्यायेन दोषवर्णनं शिक्षारूपं न निन्दातात्पर्यमाचार्याणामिति मन्तव्यम् । अत्र ग्रन्थे वणिग्व्यवहारप्रतीतेः

ममासोक्तिः । अन्येऽपि काव्यार्थचोरेभ्यः स्वग्रन्थस्य रक्ष्यतामाशासाना दृष्टाः; तथा हि— 'साहित्यपाथोनिधिमन्थनोत्थं कर्णामृतं रक्षत हे कवीन्द्राः। यत्तस्य दैत्या इव लुण्ठनाय काव्यार्थचोराः प्रगुणीभवन्ति' इति ॥ २ ॥

पश्यति परेषु दोषा-
नसतोऽपि जनः सतोऽपि नैव गुणान् ।
विपरीतमिदं स्वस्मि-
न्महिमा मोहाञ्जनस्यैषः ॥ ३ ॥

पश्यतीति ॥ जनः पामरजनः, 'जनो महर्लोकात्परलोके च पामरे' इति विश्वः । अज्ञ इति यावत् । परेष्वसतः अविद्यमानानपि दोषान् पश्यति विचारयति, सतो विद्यमानानपि गुणान्न पश्यत्येव; इदं स्वस्मिन्विपरीतं पश्यति, अविद्यमानान् गुणान् पश्यति विद्यमानान् दोषान्न पश्यतीत्यर्थः । इदमन्यथादर्शनं तमोमूलाज्ञानमूलमित्याह—महिमा मोहाञ्जनस्यैष इति । लोके ह्यञ्जनं भूतलादिच्छन्नं विद्यमानं वस्तु साक्षात्कारयति, अदृश्याञ्जनं परेभ्यस्तद्धारिणं विद्यमानमेवादृश्यं करोति, तथा मण्डूकवसाञ्जनादिकं वंशोरगत्वाद्यविद्यमानमपि दर्शयति; एवं मोहाञ्जनमात्मन्यविद्यमानानपि गुणान् दर्शयति परेषु विद्यमानान् गुणान्न दर्शयतीत्यज्ञानेऽञ्जनत्वारोपः । तत्र प्रतिनियतविपरीतदर्शनहेतुत्वाल्लोकसिद्धाञ्जनापेक्षया वैलक्षण्यम् । तद्वाक्यार्थस्य पश्यतीत्यादिपूर्ववाक्यार्थसमर्थनार्थत्वात् काव्यलिङ्गालंकारः । 'राजन् सर्षपमात्राणि परच्छिद्राणि पश्यसि । आत्मनो मेरु-

मात्राणि पश्यन्नपि न पश्यसि ॥' इत्यादि स्मारितम्। स्वदोषस्य स्व-ज्ञातत्वेऽपि निर्दोष इवाभिनयतीत्यर्थः ॥ ३ ॥

यो यदीयं क्षीरान्नादिकं भुक्त्वा तद्विषये द्रोहमाचरति, तस्मिन् कृतघ्नेऽज्ञानिनि कीर्तिः करुणा सदाचारश्च नास्तीत्यमुमर्थं श्लेषेण सनिदर्शनमाह—

यत्र पयःप्रभृति स्वं
भुक्त्वासत्यानुषक्तधीश्चोरः ।
पशुवृत्तिगणे तस्मि-
न्नपि नाम यशोदयावृत्तम् ॥ ४ ॥

यत्रेति ॥ यत्र यस्मिन्, पशूनां (वृत्तिः) स्थितिरिव स्थितिर्येषां तेषां गणे समूहे, विद्यमान इति शेषः, पयःप्रभृति स्वं भुक्त्वा क्षीरादि द्रव्यं भुक्त्वा, चोरः सन् असत्यानुषक्तधीर्भवति, तस्मिन्समूहे, यशः गुणवत्त्वप्रसिद्धिः, दया करुणा, वृत्तं सद्वृत्तिः सदाचारः, अपि नाम भवति किं। अत्र बुद्धिसंप्रतिपत्त्यर्थं श्लेषेण निदर्शयति— चोरः कृष्णः, पशूनां वृत्तिः स्थितिर्यस्मिन् तस्मिन् गणे नन्दव्रजे, पयःप्रभृति स्वं भुक्त्वा। असत्यानुषक्तधीः सत्यभामासक्तबुद्धिर्न भवति, तदानीं सत्यभामाविवाहाभावात्; तस्मिन् गणे यशोदया कृष्णमात्रा, वृत्तं वर्तनं, अपि नाम भवेत्। पूर्वत्र गर्हायामपिः, इह संभावनायां; यद्वा तत्र गणे गोव्रजे यशोदया वृत्तं अपि नाम भवेत्किं, न भवत्येव, यशोदाया गृहे वर्तमानत्वादिति भावः ॥ ४ ॥

हरिकरपुष्करहंसं
हारमणीनां प्रसूतिमिव लक्ष्म्याः ।
पित्तेन पाञ्चजन्यं
पीतं पश्यन्भिषज्यति कम् ॥ ५ ॥

हरीति ॥ हरेः करपुष्करे हस्तारविन्दे हंसमिव स्थितं, अनेन धावल्योक्तिः, लक्ष्म्याः हारमणीनां प्रसूतिमिव कारणमिव स्थितं, अनेन अतिधावल्योक्तिः, कारणगुणा हि कार्यगुणानारभन्त इति न्यायात् । पाञ्चजन्यं भगवच्छङ्खं, पित्तेन स्वनयनगतपैत्त्यदोषेण, पीतं पश्यन्, अज्ञ इति शेषः; कं भिषज्यति भिषजं करोति स्वदोषनिवर्तकमिच्छति, न कमपीत्यर्थः । भिषज् चिकित्सायामित्यस्मात् कण्ड्वादित्वाद्यक् । स्वदोषमजानन् पीतः शङ्ख इति मनुते, न स्वदोषनिवर्तनाय प्रयतते; एवमनात्मज्ञोऽपि स्वाज्ञानादिनिवर्तनाय सत्सहवासादिकं न करोति, परं तु देहात्मैक्यादिकमेव मनुते; अहो किमस्यानिपुणतेत्यर्थे प्रस्तुते, तद्विहाय तत्सरूपाप्रस्तुतार्थनिबन्धनादप्रस्तुतप्रशंसालंकारः ॥ ५ ॥

स्फटिकः स्वभावशुद्धः
स एव सन् सहति सर्वमारोपम् ।
भवति न तत्रानास्था
तदुपाधिषु वा भवत्यास्था ॥ ६ ॥

स्फटिक इति ॥ स्वभावशुद्धः स्फटिकः स एव सन्, स्फटिकत्वाकारेणेत्यर्थः; सर्वमारोपं जपाकुसुमादिसान्निध्येन रक्तत्वाद्यारोपं,

सहति। रक्तः स्फटिक इत्यादिप्रतीतिविषयतां भजते, षह मर्षण इत्यस्माच्चौरादिकादाधृषीयत्वेन वैकल्पिकणिच्त्वाण्णिजभावे कर्तरि लट्, अतोऽस्य परस्मैपदम्। नैतावता शुद्धस्फटिकरूपेण अनुपादित्सा, तदुपाधिषु उपादित्सापि नास्तीत्याह—भवतीति। तत्र शुद्धस्फटिके अनास्था तदर्थिनोऽनभिलाषो न भवति, नायं शुद्धस्फटिक इति तत्परित्यागबुद्धिर्न भवति, तदुपाधिषु जपाकुसुमादिषु, आस्था वा स्वसंसर्गेण स्वधर्मासञ्जका उत्कृष्टा इति तेष्वभिलाषो वा न भवति। एवं स्वभावशुद्ध एवात्मा देहेन्द्रियत्वाद्यारोपं सहते, नैतावता देहेन्द्रियादय उपादेयाः, आत्मैवोपादेयः, एवंज्ञानाभावे अनिपुणतैवेति भावः। पूर्ववदलङ्कारः ॥ ६ ॥

स्थलपरिशेषितजलधेः
सविधे संजातडम्बरं जलदम्।
प्रहसन्ति पाण्ड्यनद्यः
शुक्तिमुखैर्मौक्तिकस्त्यानैः ॥ ७ ॥

स्थलेति ॥ पाण्ड्यनद्यः ताम्रपर्ण्याद्याः, स्थलमात्रपरिशेषितजलधेरगस्त्यस्य सविधे समीपे, संजातडम्बरं जलदं त्वया समुद्राः पीताः मयापि समुद्रोदकं पीतमिति गर्जन्तमिव स्थितं मेघं, वीक्ष्य मौक्तिकैः स्त्यानैः निबिडैः, शुक्तय एव मुखानि तैः, प्रहसन्तीवेत्युत्प्रेक्षा। तन्त्रचतुष्टयासाधारणपाण्डित्यवन्निकटे यत्किञ्चिदुपन्यासैः गर्जन्तं पण्डितमानिनं सर्वेऽपि परिहसन्ति, मूढस्तन्न जानातीति भावः ॥ ७ ॥

प्रतिपन्नवामदृष्टिः

स्तन इव कश्चित्समुन्नतोऽप्यधिकम् ।
पतनमधिगम्य समये
परिहासरसावहो भवति ॥ ८ ॥

प्रतिपन्नेति ॥ कश्चिद्दुर्जनः, प्रतिपन्नवामदृष्टिः प्राप्तविषमदृष्टिः, ऐश्वर्यादिमत्तः सन् सदसद्विभागानादरेण सर्वत्र कुटिलवृत्तिमाचरन्नित्यर्थः । अधिकमत्यन्तं, समुन्नतोऽपि ऐश्वर्यादिसमृद्धोऽपि, समये दुष्कर्मविपाकादिसमये, पतनमधिगम्य 'पतनान्ताः समुच्छ्रयाः' इति न्यायेन हानिं प्राप्य, स्तन इव परिहासरसावहो भवति। अयं गर्वितः सर्वान् परिभूयेदानीं सर्वैरपि परिभूयमानः सन् हास्यास्पदं भवतीति भावः । स्तनपक्षे—प्रतिपन्ना आश्रिता, वामदृष्टिः स्त्री यस्य स तथोक्त इत्यर्थः । स्पष्टमन्यत्। स्तन इवेत्युपमया बीभत्सरसो व्यज्यते । तेन कादाचित्कैरल्पकालवर्तिभिरतितुच्छैः कालान्तरे नृपतस्करादिपीडाप्रापकैरैश्वर्यादिभिः किमर्थं मदितव्यमिति जुगुप्सा गम्यते । 'विद्यामदो धनमदस्तृतीयोऽभिजनो मदः । मदा एतेऽवलिप्तानामेत एव सतां दमाः' इत्युक्तम् ॥ ८ ॥

बहुधा स्वोपकारके स्वदोषाच्छादके स्वप्रसिद्धिसंपादके मित्रे प्रत्युपकर्तव्यं, तदभावे महान्दोषः, अत एव भगवता रामचन्द्रेण सीतावृत्तान्ताहरणोपकारिणो हनुमतः स्वाङ्गसंश्लेषरूपमहोपकारं कृत्वाऽपि तत्रासन्तुष्टेनोक्तं—'मय्येव जीर्णतां यातु यत्त्वयोपकृतं कपे ।

नरः प्रत्युपकारार्थी विपत्तिमभिकाङ्क्षति' इति। अतो विवेकिना प्रत्युपकाराकरणे तत्र द्वेषकरणे च आत्मनाश इत्याह—

बहु विदधत्युपकारान्
गुप्त्वा दुरितं प्रकाशयति तेजः।
सुहृदि विहिताहितमति-
र्यन्न प्रत्युपकरोति न तत् ॥ ९ ॥

बहिति ॥ सुहृदि विहिताहितमतिः सन्, यत् यस्मान्न प्रत्युपकरोति, तत्तस्मात्, अस्तिर्भवन्तीपरोऽप्रयुज्यमानोऽप्यस्तीत्युक्तेः न न भवति, तस्य सत्ता नास्ति, तज्जन्म वृथा; प्रत्युत तस्य प्रत्यवायश्चेति भावः। 'सत्कृताश्च कृतार्थाश्च मित्राणां न भवन्ति ये। तान्मृतानपि क्रव्यादाः कृतघ्नान्नोपभुञ्जते' इत्युक्तम्। अत्र उत्तरार्द्धे 'षष्ठोऽयं नलघू वा' इति षष्ठगणस्थाने लघुप्रयोगः ॥ ९ ॥

तान्घ्नन्ति हन्त शान्तं
येभ्यः सिद्ध्येयुरसितवर्त्मानः।
अगणितनिजप्रणाशैः
किमाश्रयाशैरनाश्यमिह ॥ १० ॥

तानिति ॥ असितवर्त्मानः दुर्मार्गवृत्तयः, येभ्यः पुरुषेभ्यः, सिद्ध्येयुः लब्धसत्ताका भवेयुः, तान् घ्नन्ति तानेव हिंसन्ति, हन्तेति खेदे, हन्तहर्षविषादयोरिति निघण्टुः। उपजीव्यविरोधो न युक्त इति भावः। शान्तं एतद्दोषकीर्तनपापं शाम्यतु, आशंसायां भूतवच्चेति क्तप्रत्ययः।

ते पर्णाश्रितकीटवत् स्वयं नश्यन्तः परान्नाशयन्तीत्याह । अगणितेति। अगणितनिजप्रणाशैः आश्रयाशैः स्वोपजीव्यनाशकैः किमनाश्यं, सर्वं नाश्यमेव । तत्र निदर्शनतयार्थान्तरं— असितवर्त्मनः कृष्णवर्त्मनः अग्नयः, येभ्यो वृक्षेभ्यः सिद्धयेयुः वृक्षाणां परस्परसङ्घर्षणेन उत्पन्ना भवेयुः, तानेव वृक्षान् घ्नन्ति दहन्ति; अगणितनिजप्रणाशैः—'आतृणं पचते वह्निः' इति स्वनाशमप्यविचार्य आश्रयमश्नद्भिः आश्रयाशैरग्निभिः, किमनाश्यं किमभक्ष्यं, सर्वं भक्ष्यमेवेत्यर्थः ॥ १० ॥

स्वोपकारमात्रपराः केचिदज्ञानिनः सर्वमपि स्वार्थमपेक्षन्त इत्यभिप्रेत्याह—

नवदलपुटे कल्प्या यस्य प्रभोरपि तल्पधी-
र्नटपरिबृढो यस्याधस्ताच्छ्रमं शमयिष्यते ।
वटविटपिनस्तस्याङ्कूरानुत्कटपल्लवान्
स्थपुटचटकापेक्षी भिक्षुः प्रतिक्षणमीक्षते ॥ ११ ॥

नवदलेति ॥ यस्य वटस्य नवदलपुटे, प्रभोः सर्वेश्वरस्यापि, तल्पधीः कल्प्या, प्रतिकल्पं कल्पादौ शय्याबुद्धिः कल्प्यत इत्यर्थः । यस्य वटस्याधस्तान्नटपरिबृढः शिवः श्रमं शमयिष्यते, लोकान् संहृत्य श्रमं परिहरिष्यति, दक्षिणामूर्तेर्वटवृक्षस्याधोवासित्वं प्रसिद्धम् ; तस्य तज्जातीयस्य वटविटपिनः, अनुत्कटपल्लवान् सम्यगविकसितदलान्, अङ्कूरान्, अभीशुवल्मीकादिवदङ्कूरशब्दो ह्रस्वमध्यो दीर्घमध्यश्च । भिक्षुः स्थपुटचटकापेक्षी निम्नोदपानपालभूतपत्रपुटापेक्षी, प्रतिक्षणमी-

क्षते, कदा विशालपर्णानि भविष्यन्ति कदा ग्रहिष्यामीति स्वप्रयोजनतत्परो भवतीत्यर्थः ॥ ११ ॥

अनन्तकल्याणगुणगणे निर्दोषे भगवत्यपि दोषानारोपयन्तः परदूषणैकतत्परा अल्पगुणे बहुलदोषे जने किमित्युपेक्षन्त इत्याह—

निरवधिगुणग्रामे रामे निरागसि वागसि-
स्फुरणमुषितालोका लोका वदन्ति सदन्तिके ।
वरतनुहतिं वालिद्रोहं मनागपसर्पणं
परिमितगुणे स्पष्टावद्ये मुधा किमुदासते ॥ १२ ॥

इति श्रीकवितार्किकसिंहस्य वेदान्ताचार्यस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य कृतिषु सुभाषितनीव्यां

अनिपुणपद्धतिः

प्रथमा ॥

निरवधीति ॥ निरवधिगुणग्रामे निरवधिकगुणसमूहे, निरागसि निर्दोषे रामे, 'बहवो नृप कल्याणगुणाः पुत्रस्य सन्ति ते । सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः । आर्यः सर्वसमश्चैव बुद्धिमान्नीतिमानपि ।' इत्याद्युक्तेः, लोका दुर्जनाः, वाच्च एवासयः खड्गाः तेषां स्फुरणैः जृम्भणैः विलसनैश्च, मुषिताः आलोका ज्ञानप्रकाशा बाह्यालोकाश्च येषां ते तथोक्ताः सन्तः, वरतनुहतिं लोकहितार्थं विश्वामित्राज्ञाकृतं (ताटकावधं), वालिद्रोहं अमार्गप्रवृत्तदुष्टवालिवधं, मनागपसर्पणं

खरयुद्धे तस्यात्यन्तसन्निकर्षे सति स्थलाभावेन पश्चात्पादप्रसर्पणं च, सदन्तिके सत्पुरुषसमीप एव, निर्भयाः सन्तः, वदन्ति दोषत्वेन कथयन्ति। परिमितगुणे, स्पष्टावद्ये स्फुटापरिमितदोषे, पृथग्जने, मुधा व्यर्थं, किं किमर्थं, उदासते उपेक्षन्ते। वाक्कण्डूतिनिवृत्त्यै यथेच्छं दूषयितुं विषये सत्यपि, तद्विहाय परमात्मनि किमिति दोषानारोपयन्ति, परमात्मन्येव दोषारोपणे किमुत सत्सु दोषारोपणमिति भावः ॥ १२ ॥

इति श्रीमच्छ्रीशैलकुलतिलकस्य वेङ्कटाचार्यसोमसुतः सुतस्य
श्रीश्रीनिवासविदुषः कृतिषु सुभाषितनीवी-
व्याख्यायां रत्नपेटिकाख्यायां

अनिपुणपद्धतिः

प्रथमा ॥



दृप्तपद्धतिः ॥

दुर्विदग्धाः केचन परोत्कर्षासहिष्णवः परसाम्यलाभाय तद्धर्मानभिनयन्ति, नैतावता 'सुमेरुशिखरस्थोऽपि काकः किं गरुडायते?' इति न्यायेन तदीयोत्कर्षः संभवति, तेषां च निकर्षः संभवति इत्यभिप्रायेण दृप्तपद्धतिरारभ्यते ॥

तदेव गृह्यतां नाम च्छागमण्डूकरासभैः ।
तिसृणां तावता हन्त मूर्तीनां किमिहागतम् ॥ १ ॥

तदेवेति ॥ छागमण्डूकरासभैः तदेव त्रिमूर्तिसंबन्ध्येव नाम गृह्यतां, कामचारे कर्मणि लोट् । छागेनाज इति ब्रह्मणो नाम गृहीतं 'अजो हरौ हरे कामे विधौ छागे रघोःसुते' इति विश्वः । मण्डूकेन हरिरिति विष्णोर्नाम गृहीतम् । रासभेन हर इति रुद्रस्य नाम गृहीतम् 'हरा रुद्राग्निगर्दभाः' इति रत्नमालायाम् । तावता तिसृणां मूर्तीनां ब्रह्मविष्णुशिवानाम् संबन्धि, 'न तिसृ चतसृ' इति न नामि दीर्घः । इह छागमण्डूकरासभेषु किमागतं, तदीयब्रह्मत्वादिकं किं प्राप्तमित्यर्थः । तन्नामधारणमात्रेण न तत्त्वं भवति । अतो दृप्तैः प्रसिद्धपुरुषनामधारणमात्रेण न तत्प्रसिद्धिर्लभ्यत इति भावः । यद्वा इह जगति तावता तिसृणां मूर्तीनां किमागतं, किं न्यूनत्वमागतम्? तेषां ब्रह्मत्वाद्यप्राप्तौ खलु न्यूनत्वं, तदभावात्किमनिष्टमित्यर्थः ॥ १ ॥

महतां स्थानवर्तित्वमात्रेणापि न तन्माहात्म्यं लभ्यत इत्याह—

अण्डजाः पुण्डरीकेषु समुद्रेषु जनार्दनाः ।
नीलकण्ठाश्च शैलेषु निवसन्तु न तेन ते ॥ २ ॥

अण्डजा इति ॥ पुण्डरीकेषु अण्डजा हंसा निवसन्तु, नैतावता पुण्डरीकवर्ती अण्डजो ब्रह्मा भवति । समुद्रेषु जनार्दना जन्तुविशेषा निवसन्तु, नैतावता समुद्रशायी विष्णुर्भवति । नीलकण्ठा मयूराः शैलेषु निवसन्तु, नैतावता कैलासनिवासः शिवो भवति । तदेवाह— न तेन त इति । तेन तन्नाम धृत्वा तत्स्थानाक्रमणेन हंसजनार्दन-मयूरास्ते ब्रह्मविष्णुशिवाः न भवन्ति ॥ २ ॥

गर्ववशेन परकीयवेषधारणेऽपि परगतपाण्डित्यादिकं न संपादयितुं शक्यत इत्यभिप्रेत्याह—

कामं लिखतु संस्थानं कश्चिद्रूपं च भास्वतः ।
अभित्तिविहितालम्बमालोकं विलिखेत्कथम् ॥ ३ ॥

काममिति ॥ कश्चित् शिल्पी, भास्वतः सूर्यस्य, संस्थानं बिम्बम्, लिखतु चित्रे लिखेत्, रूपं अरुणरूपं च लिखेत्; भित्त्या विहित आलम्बः आलम्बनं यस्य स तथोक्तः, स न भवतीत्यभित्तिविहितालम्बः, तम् । आलोकं प्रकाशं, कथं विलिखेत् । भित्त्यालम्बनत्वाद्बिम्बादिकं लिखेत्, तेजस्त्वनालम्बनत्वात् कथं विलिखेदिति भावः ॥ ३ ॥

अल्पस्य साम्यार्थं महाजनसंबन्ध्यसाध्यकृत्याचरणानुकरणमयशःकारणमित्यभिप्रेत्याह—

अपि सत्पथनिष्ठानामाशाः पूरयतामपि ।
अगस्त्यवृत्तिर्मेघानां हन्त मालिन्यकारणम् ॥ ४ ॥

अपीति ॥ सत्पथनिष्ठानां आकाशवर्तिनां, सदाचारवतामिति च गम्यते । आशा दिशः पूरयतां, अपेक्षितार्थान् ददतामिति च गम्यते । मेघानामगस्त्यवृत्तिः समुद्रोदकपानं, मालिन्यस्य नैल्यस्य कारणं, हन्तेति खेदे ॥ ४ ॥

कश्चित्केनचिद्विशेषेणाधिकोऽपि भवतु ; तथापि सर्वस्य सातिशयत्वान्न गर्ववता भवितव्यमित्यभिप्रेत्याह—

अस्तु तावदगस्त्येन जह्नोर्महिमनिह्नवः ।
का कथा तस्य बालस्य विश्वग्रासेऽप्यतृप्यतः ॥ ५ ॥

अस्त्विति ॥ जह्नुमुनिना गङ्गा पीता, तदेवाश्चर्यमभूत् । अगस्त्येन सकलसमुद्रान् करतलपुटगतान् कृत्वा पिबता जह्नोर्महिमनिह्नवः तावदस्तु ततोऽप्याश्चर्यावहमिदमप्यद्भुतचरित्रं तिष्ठतु । विश्वग्रासेऽपि प्रलये सर्वं ग्रसित्वापि अतृप्यतः, तस्य बालस्य प्रसिद्धस्य वटपत्रशायिनः, का कथा तन्महिम्नि किं वक्तव्यम् । ततोऽप्यत्यद्भुतमिदम् । अतस्तद्विचार्य न दृप्तेन भवितव्यमिति भावः ॥ ५ ॥

कतिपयधर्ममात्रेणान्यसाम्यं न लभ्यत इत्याह—

दृप्तसारङ्गयूथोऽपि दंष्ट्रानखरवानपि ।
भूभृत्कटकसंस्थोऽपि सारमेयो न सिंहति ॥ ६ ॥

दृष्टसारङ्गेति ॥ दृष्टः सारङ्गयूथो मृगयूथो गजयूथश्च येन स तथोक्तः, दंष्ट्रा नखराश्च अस्य सन्तीति तथोक्तः । भूभृत्कटकं राजशिबिरम् पर्वतनितम्बश्च, तत्र संस्थः स्थितोऽपि; सुपि स्थ इत्यत्र सुपीति योगविभागात् कर्तरि कः, स्थ इत्यस्यारम्भसामर्थ्याद्भावे विधानात् । सारमेयः शुनकः, न सिंहति सिंह इव नाचरति ; सर्वप्रातिपदिकेभ्यः क्विब्वेति आचारे क्विप्, ततो धातुत्वाल्लट् ॥ ६ ॥

मित्रमतिक्रामन् शुभान्यलभमानो नष्टो भवेदित्यभिप्रायेणाह—

सत्पथं छादयन्मित्रमपि व्यालस्तमोमयः ।
अतीतपर्वा जगतामदृश्यः सहसा भवेत् ॥ ७ ॥

सत्पथमिति ॥ सत्पथं सन्मार्गवर्तिनं आकाशवर्तिनं च, मित्रं सहायं सूर्यं च, छादयन्, तमोमयः तमःप्रचुरः राहुरूपश्च ; 'तमस्तु राहुःस्वर्भानुः' इत्यमरः । व्यालः क्रूरः सर्पश्च ; 'व्यालो भुजङ्गमे क्रूरे श्वापदे दुष्टदन्तिनि' इति विश्वः । अतीतानि पर्वाणि उत्सवा यस्य स तथोक्तः, शुभरहित इत्यर्थः ; अतीतं पर्व अमावास्यारूपं यस्य स इति च । सहसा अदृश्यो भवेत् नष्टो भवेत्, अप्रत्यक्षो भवेच्च ॥७॥

दुर्मार्गाणां त्याग एव युक्त इत्याह—

धुर्याणामपि सत्कार्ये गुणशालिविमर्दिनाम् ।
अनागमविदां युक्तमपनीतेर्निवारणम् ॥ ८ ॥

धुर्याणामिति ॥ सत्कार्ये समीचीनप्रयोजने, धुर्याणां धुरन्धराणा-

मपि; धुरं शकटावयवं वहन्तीति धुर्याः, तेषामपि च; 'धुरो यड्कौ' इति यत्प्रत्ययः । गुणैः शालन्ते प्रकाशन्त इति गुणशालिनः, शाङ्-श्लाघायामिति धातोर्णिनिप्रत्यये लडयोरभेदव्यपदेशमाश्रित्य लकारप्रयोगः, तान्विमर्दयन्ति पीडयन्तीति विमर्दिनः तेषां; गुणेन आवृत्त्या शालीन् व्रीहिसस्यानि विमर्दयन्ति भक्षयन्तीति तथोक्तास्तेषामिति च । अनागमविदां शास्त्रानभिज्ञानाम्, पुनरागमनमजानतां च । अपनीतेः अपन्यायाद्धेतोरपसारणाच्च, निवारणं युक्तम् । अत्र दृप्तेषु सस्यलुण्टाकवृषभव्यवहारप्रतीतेः समासोक्तिः ॥ ८ ॥

बलोत्तरेण हरिणा नागमल्लविभेदिना ।
सृगालः साम्यमाकाङ्क्षन् शौर्याधिक्यं न विन्दति ॥

बलेति ॥ बलोत्तरेण बलाधिकेन, बलभद्रानुजेन च; नागमल्लविभेदिना गजश्रेष्ठभेदिना कालीयचाणूरमल्लविभेदिना च; हरिणा सिंहेन कृष्णेन च । सृगालः जम्बुको राक्षसश्च, पौण्ड्रकवासुदेव इत्यर्थः । 'सृगालौ दैत्यजंबुकौ' इति रत्नमाला, 'सृगालो जम्बुके दैत्ये' इति विश्वश्च । साम्यमाकाङ्क्षन्; शौर्याधिक्यं शौर्यातिशयम्, शौरेराधिक्यं च; न विन्दति । अत्र क्षुद्रो गर्ववशान्महद्भिः संघर्षं कुर्वन् तदुत्कर्षं न प्राप्नोतीत्यर्थे वर्ण्यमाने, अप्रस्तुतः सिंहजम्बुकवृत्तान्तो वर्णितः; तथा हरिपौण्ड्रकवासुदेववृत्तान्तोऽप्यप्रस्तुतो वर्णित इति अप्रस्तुतश्लेषमूलकोऽप्रस्तुतप्रशंसालंकारः ॥ ९ ॥

एतादृशो दृप्तः केन चित्सत्प्रभुणा निगृह्यत इत्याह—

सुदर्शनभृता कश्चिदजहत्कीर्तिमत्सरः ।
महाशान्तपदाकर्षी जलजन्तुर्निगृह्यते ॥ १० ॥

सुदर्शनेति ॥ सुदर्शनभृता सौम्यदर्शनवता चक्रधरेण च । अजहत् अपरित्यजन् कीर्तौ परकीययशसि मत्सरो द्वेषो यं स तथोक्तः ; नक्रपक्षे अजहत् कीर्तिमत् सर इति पदत्रयम्, कीर्तिमत् कर्दमवत् सरः अजहत् अत्यजन्नित्यर्थः, नाभ्यस्ताच्छतुरिति शतुर्नुमभावः ; 'कीर्तिः प्रसादयशसोर्विस्तारे कर्दमेऽपि च' इति विश्वः । महाशान्तानां साधुजनानां पदाकर्षी स्थानापहारकः, गजेन्द्रपदाकर्षी च ; जलजन्तुर्जडजनः नक्रश्च, निगृह्यते । प्रकृताप्रकृतश्लेषालंकारः ॥ १० ॥

दृष्टविनीतयोरत्यन्तवैधर्म्यात् कथंचित्साधर्म्यसत्त्वेऽपि न तुल्यतेत्यभिप्रायेणाह—

गतिर्व्योम्ना किं तदुरुडमभिटङ्कैत चटकः
पिबत्वम्भः क्षारं न खलु कलशीसूनुरलसः ।
कलः कण्ठे नादः क इव मशकः किन्नरपतिः
कथंचित्साधर्म्ये क्षिपति न हि वैधर्म्यनियमः ॥

गतिरिति ॥ गतिर्व्योम्ना, गरुडस्य चटकस्य च आकाशे गमनमस्ति ; तत् चटकः कलविङ्कः, गरुडमभिटङ्कैत किं अभियायात्किं ; तावन्मात्रेण चटकस्य किं गरुडसामर्थ्यमस्तीति भावः । अलसः उदरशूलादिरोगवान्, क्षारं अम्भः लवणमिश्रं उदकम्, पिबतु ; 'क्षारो रसान्तरे धूर्ते लवणे कचभस्मनोः' इति विश्वः ; तावता कलशीसूनुर्न

खलु, रोगी लवणसमुद्रपायी अगस्त्यो न भवति खलु । कण्ठे कलः नादः। मशकस्याप्यव्यक्तमधुरध्वनिरस्ति, तावता मशकः क इव; किन्नरपतिः; इवशब्दो वाक्यालंकारे, इवैवादयो वाक्यपूरणार्था इति शब्दप्रकाशिकाकारवचनात् । वैधर्म्यनियमः कथंचित्साधर्म्यं न क्षिपति, अविरोधित्वात्; नैतावता तस्यान्यदीयोत्कर्षप्राप्तिरिति भावः ॥ ११ ॥

दृष्टः सासूयतया परश्रेयोऽसहिष्णुत्वेन परावज्ञखत्वेऽपि स्वस्यैवा. शतावहत्वमावहतीत्यभिप्रेत्याह—

निमीलयतु लोचने न हि तिरस्कृतो भास्करः
श्रवः स्थगयतु स्थिरं परभृतः किमु ध्वाङ्क्षति ।
स्वयं भ्रमतु बालिशो न खलु बम्भ्रमीति क्षितिः
कदर्थयतु मुष्टिभिः कथय किं नभः क्षुभ्यते ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य
कृतिषु सुभाषितनीव्यां
दृष्टपद्धतिः
द्वितीया ॥

निमीलयत्विति ॥ स्वयं सूर्ये असहिष्णुत्वेन लोचने निमीलयतु, भास्करो न तिरस्कृतो हि । श्रवः श्रोत्रं कोकिलध्वनावसहिष्णुत्वेन

अङ्गुल्या स्थिरं दृढम्, स्थगयतु आच्छादयतु ; 'स्थग आच्छादने' इति चौरादिकाण्णिच् । तावता परभृतः कोकिलः किमु ध्वाङ्क्षति, काक इवाचरति किं। बालिशो मूर्खः, 'मूर्खवैधेयबालिशाः' इत्यमरः । स्वभ्रमणेन क्षितिर्भ्रमतीति मूर्खो बुद्ध्वा स्वयं भ्रमतु अविच्छिन्नं चक्राकारं भ्रमतु, क्षितिः न बंभ्रमीति स्वनेत्रभ्रमणेन पृथिवी भ्रमतीति भानमात्रमिति भावः । मूर्ख इति शेषः । मुष्टिभिः नभः कदर्थयतु क्षोभयतु ; नभः क्षुभ्यते किं, नभः संक्षोभः संभवति किं, कथयेति भावः ॥ १२ ॥

इति श्रीमच्छ्रीशैलकुलतिलकस्य वेङ्कटाचार्यसोमसुतः सुतस्य
श्रीश्रीनिवासविदुषः कृतिषु सुभाषितनीवी-
व्याख्यायां रत्नपेटिकाख्यायां
दृष्टपद्धतिः
द्वितीया ॥



खलपद्धतिः ॥

अथ खलजनस्वरूपमाह—

परचिन्तैकनिरताः पुत्रादिष्वप्यसङ्गिनः ।
योगिनामनुकुर्वन्ति विशृङ्खलधियः खलाः ॥ १ ॥

परेति ॥ परेषां चिन्तायां दोषगवेषणे एकस्यामेव निरताः; 'शुनां च पिशुनानां च परवेश्मप्रवेशने । प्रयोजनं न पश्यामः पाखाणां दूषणादृते ॥', शिवभागवतवत्समासः; अन्यथा चिन्तैकशब्दयोः प्रथमं समासे पूर्वकालैकेत्यादिना एकशब्दस्य पूर्वनिपातः स्यात् । योगिविषये परस्य परमात्मनश्चिन्तायामेकस्यामेव निरताः । पुत्रादिष्वप्यसङ्गिनः— एकत्र स्वोदरपोषणमात्रतत्परत्वेन, अन्यत्र वीतरागत्वेन; विशृङ्खलधियः—शास्त्रीयनियमं परित्यज्य स्वतन्त्रबुद्धयः, अन्यत्र विषयप्रतिबन्धरहितधियः; खलाः, योगिनां अनुकुर्वन्ति सदृशा भवन्ति । कर्मणः शेषत्वविवक्षायां षष्ठी । अत्यन्तविरुद्धयोग्युपमानेन स्तुतिद्वारा निन्दा अभिव्यञ्जिता । यथा योगिनोऽत्युत्कृष्टधर्मवत्त्वेन मुक्तिस्थानं यन्ति, तथा एतेऽत्यन्तनिन्दितधर्मवत्त्वेन नरकस्थानमिति किमेषां जन्मनेति शोच्यत्वं प्रतीयते । 'परारन्ध्रेषु जात्यन्धाः परदारेष्वपुंसकाः । परीवादेषु ये मूकास्तेऽतीव दयिता मम ॥' इति भगवद्वाक्यम् । 'आक्रोशपरिवादाभ्यां विहिंसन्त्यबुधा

बुधान् । वक्ता पापमुपादत्ते क्षममाणो विमुच्यते ॥' इत्यादिकमनुसन्धेयम् ॥ १ ॥

आत्मार्थं युक्तवित्तानां मित्रमण्डलभेदिनाम् ।
अतिलङ्घितलोकानां न बन्धः केन चित्क्वचित् ॥ २ ॥

आत्मार्थमिति ॥ आत्मार्थे स्वार्थम्, परमात्मसमाराधनार्थे; युक्तं संचितं वित्तं येषां ते तथोक्ताः तेषाम्; मित्रमण्डलभेदिनां—मित्रसमूहभेदनशीलानाम्, सूर्यमण्डलभेदिनां च; अतिलङ्घितलोकानां—अतिलङ्घिता अवमानविषयीकृता अतिक्रान्ताश्च, लोका जना भूरादिलोकाश्च यैस्ते तथोक्तास्तेषाम्; क्वचिदपि केनापि बन्धो निग्रहः यमबन्धनं च, नास्ति । अत्रापि योगिसाम्यं गम्यते; पूर्ववदभिप्रायः ॥ २ ॥

'दुर्जनस्य विशिष्टत्वं परोपद्रवकारणम् । उपोषितस्य व्याघ्रस्य पारणं पशुमारणम् ॥' इतिवत् दुर्जनस्य गुणाः परपीडनायैवेत्याह—

स्नेहः शैत्यं प्रसादश्च कोशत्यागश्च जायते ।
आसन्नपरपीडार्थं निस्त्रिंशस्यासितात्मनः ॥ ३ ॥

स्नेह इति ॥ असितः तमोमलिनः आत्मा मनः यस्य स तथोक्तः तस्य, श्यामरूपस्य; निस्त्रिंशस्य क्रूरस्य, खड्गस्य च, 'निस्त्रिंशो निर्दये खड्गे' इति विश्वः । स्नेहः सौहार्दम्, आयुधलेपनार्थद्रव्यविशेषश्च; शैत्यं सौम्यत्वं निशितत्वं च; प्रसादः अनुग्रहः, मार्जनसंस्कारकृतस्वच्छता च; कोशत्यागः धनत्यागः चर्मपिधानत्यागश्च; आस-

नानां परेषां अन्येषां शत्रूणां च पीडार्थम्, जायते। प्रकृताप्रकृत-श्लेषः ॥ ३ ॥

केचिन्महाकुलोत्पन्ना अपि दुर्मार्गवृत्तिमाचरन्तीत्याह—

जनित्वाऽपि महागोत्रे निम्नगा वक्रचेष्टिताः।
वैपरीत्यं वितन्वन्ति समेषु विषमेषु च ॥ ४ ॥

जनित्वेति ॥ महागोत्रे महावंशे महापर्वते च; जनित्वाऽपि, निम्नगाः पूर्वकर्मानुसारेण नीचमार्गगामिनः, नद्यश्च; वक्रचेष्टिताः कुटिलव्यापाराः, अनृजुप्रवाहाश्च; समेषु समचित्तेषु, विषमेषु दुष्ट-चित्तेषु च, वैपरीत्यं विरुद्धाचरणम्, वितन्वन्ति। 'यश्च निम्नं पर-शुना' इति न्यायेन सर्वत्र विरोधमाचरन्तीत्यर्थः। नदीपक्षे समदेशेषु निम्नत्वौन्नत्यादिकं विषमदेशेषु समत्वनिम्नत्वादिकं चेत्यर्थः ॥ ४ ॥

इदमेव मुखान्तरेणाह—

उत्पथा दुर्नदाः केचिद्बहुभङ्गभ्रमाविलाः।
तटस्थानपि निघ्नन्ति तरसा भिन्नसेतवः ॥ ५ ॥

उत्पथा इति ॥ केचिद्दुर्नदाः भिनत्ति कूलमिति भिद्यः, उनत्ति कूलमिति उद्यः, भिद्योद्यादिनदाः; उत्पथाः कूलान्तःस्थितमार्गमुल्ल-ङ्घ्य उपरिगच्छन्तः, उद्वृत्ताचाराश्च; बहुभिर्भङ्गैः तरङ्गैः भ्रमैः आव-र्तैश्च आविलाः कलुषाः सन्तः, अन्यत्र बहुभिःभङ्गैः पराभवैः, 'खला-नां कण्टकानां च द्वयमेवोचितं मतम्। उपानन्मुखभङ्गो वा दूरतो वा विसर्जनम्॥' इत्युक्तेः; भ्रमैः भ्रान्तिभिश्च आविलाः व्याकुलाः इति

गम्यते; तरसा वेगेन, भिन्नाः सेतवः जलनिवारणार्थं बन्धाः शास्त्रमर्यादाश्च यैस्तादृशाः सन्तः, तटस्थान् वृक्षानपि; निघ्नन्ति उन्मूलयन्ति, उदासीनभूतानपि बाधन्ते इति गम्यते । श्लेषनिबन्धनेयमप्रस्तुतप्रशंसा ॥

'चण्डालमपि वृत्तस्थं तमेव ब्राह्मणं विदुः । द्विजातिमपि दुर्वृत्तं चण्डालमिव तं विदुः ।' इत्यनुसृत्याह—

केनचिद्दान्तकृत्येन कुलगोत्रविमर्दिना ।
मदेन बहुधा भिन्नं मातङ्गं मन्यते जनः ॥ ६ ॥

केनेति ॥ दान्तं दमितं, दमेर्ण्यन्ताद्वा दान्तशान्तेत्यादिना निपातितः; निगृहीतमिति यावत्, तेन कृत्येन; दान्तं दन्तसंबन्धि तिर्यग्दन्तप्रहाररूपं कृत्यं तेन च; कुलं ब्राह्मणादिकुलम्, गोत्रं स्वपूर्वपुरुषपरम्परा, तद्विमर्दिना तद्विरुद्धाचरणेन, कुलपर्वतभेदिना च; मदेन गर्वेण मदोदकेन च; भिन्नं युक्तं स्रवणवन्तं च; जनः मातङ्गं चण्डालं गजं च; मन्यते ॥ ६ ॥

अनेकमुखपापात्मा छद्मसंदर्शिताश्रमः ।
कर्बुरप्रकृतिः कश्चित्कापेयकलहोचितः ॥ ७ ॥

अनेकेति ॥ अनेकमुखानि पापानि यस्य स तथोक्तः, तादृशः आत्मा मनः यस्य स तथोक्तः; छद्मना कपटेन लोकवञ्चनबुद्ध्या संदर्शितः आश्रमः यस्य स तथोक्तः; 'एकदण्डं समाश्रित्य जीवन्ति बहवो नराः' इत्युक्तेः । कर्बुरप्रकृतिः राक्षसप्रकृतिः, कश्चित्,

कापेयेन अनवस्थितचित्तत्वेन, कलहानां परैः स्पर्धानाम्, उचितः परिचयवान्, भवतीति शेषः । अनेकानि मुखानि यस्य स पापात्मा रावणः, छद्मसंदर्शिताश्रमः, कर्बुरप्रकृतिः राक्षसप्रभवः, कश्चित्, कापेयकलहोचितः वानरयुद्धयोग्यः, कपिज्ञात्योर्दगिति भावार्थे कपिशब्दाद्ढक् । कापेयं कपित्वं, कपिजातिः; तत्संबन्धिकलह इत्यर्थः ॥ ७ ॥

'श्रेष्ठोऽर्धं तु हरेत्तत्र भवेत्पादश्च कर्तरि । पादस्तेषु सभासत्सु यत्र निन्द्यो न निन्द्यते। यथाशक्ति निगृह्णीयाद्देवतागुरुनिन्दकान् ॥' इति धर्मशास्त्रादुर्जनो निन्द्यत इत्याह—

छलिनं सत्कथानर्हं स्वात्मोपहतजातिकम् ।
न निगृह्णाति यः काले सोऽपि सभ्यैर्निगृह्यते ॥ ८ ॥

छलिनमिति ॥ छलिनं— कैतववन्तम्, स्वात्मना उपहता विरुद्धाचारेण नाशिता, 'कुलमाचारकर्मणा' इत्युक्तेः; तादृशी जातिः यस्य तं, अत एव सत्कथानर्हं सद्गोष्ठ्यामयोग्यम्; काले निग्रहोचितसमये, यो न निगृह्णाति, सोऽपि सभ्यैर्निगृह्यते । अत्र निदर्शनं— छलिनं केन चिदभिप्रायेण प्रयुक्तस्य शब्दस्याभिप्रायान्तरं परिकल्प्य दूषणाभिधानं छलं, तद्वन्तं, असदुत्तरं जातिरिति दूषणं, तद्धि स्वव्याघातकत्वादिरूपं, अतः स्वात्मोपहतजातिकं उपहतस्वात्मकजातिकं; नानावक्तृकवाक्यसन्दर्भः कथा, सत्कथानर्हं समीचीनवादकथाया अयोग्यम्; काले वादकाले, यो वादी न निगृ-

ह्राति निग्रहस्थाने न दूषयति, सोऽपि सभ्यैः मध्यस्थैः निगृह्यते दूष्यते ॥ ८ ॥

निगिरन्तो जगत्प्राणानुद्गिरन्तो मुखैर्विषम् ।
दूरतः परिहर्तव्या द्विजिह्वा जिह्मवृत्तयः ॥ ९ ॥

निगिरन्त इति ॥ 'अहो खलभुजङ्गस्य विचित्रोऽयं वधक्रमः । अन्यस्य दशति श्रोत्रमन्यः प्राणैर्वियुज्यते ॥' इत्युक्तरीत्या जगत्प्राणान्वायून्, निगिरन्तो ग्रसन्तः, मुखैर्विषमुद्गिरन्तः परानिष्टसूचनमुद्गमन्तः, जिह्मवृत्तयः कुटिलवृत्तयः, द्विजिह्वाः सूचका एव सर्पाः, दूरतः परिहर्तव्याः, 'द्विजिह्वौ सर्पसूचकौ' इत्यमरः । श्लेषमूलकाभेदाध्यवसायनिबन्धनातिशयोक्त्यलंकारः ॥ ९ ॥

अकिंचित्कारिणां दुर्जनानां दर्शनस्पर्शनादिकं च पापाय भवतीत्याह—

अकिंचित्कारिणां दीनैराकृष्टगुणकर्मणाम् ।
अघाय गतसत्त्वानां दर्शनस्पर्शनादिकम् ॥ १० ॥

अकिञ्चिदिति ॥ गतसत्त्वानां गतसत्त्वगुणानां, गतासूनां च; 'द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु' इत्यमरः । स्पष्टमन्यत् ॥

दुर्मार्गसङ्गः परिहर्तव्य इत्याह—

अधिकोन्नतैरपि सुदारुणान्वितै-
रसकृद्द्रुमत्पशुगणाङ्घ्रिपीडितैः ।

विधिसिद्धनैकगुणसस्यसम्पदां
विरसस्वभावकठिनैरलं खलैः ॥ ११ ॥

अधिकेति ॥ अधिकोन्नतैः अत्यन्तगर्वितैः, उन्नतैश्च, खलान् किलोन्नतभूमौ कुर्वन्ति; सुदारुणैःअतिक्रूरैः अन्वितैः सहवसद्भिः, अन्यत्र सुदारुणेति व्यस्तं पदं तृतीयान्तम्, शोभनकाष्ठेन पशुबन्धनार्थं निखातेन, अत एव 'खलेवाली यूपो भवति' इति वेदेऽप्युक्तम्; असकृत् अनेकवारं पुनःपुनश्च, भ्रमन्तो ये पशुगणाः जनसमूहाः, 'एतावन्तो वै पशवो द्विपादश्चतुष्पादश्च' इति मनुष्याणामपि पशुत्वेनाभिधानात्, 'पशवः पाशिताः पूर्वं' इति प्रयोगाच्च; तेषामङ्घ्रिभिः पीडितैः, दुर्जना हि सर्वत्र प्रतिकूलाचरणेन सर्वैः पादेन हन्यन्ते, असकृत्पीडितैरिति संबन्धः। विरसस्वभावेन निर्दयस्वभावेन कठिनैः दाक्षिण्यरहितैः, अन्यत्र अनार्द्रस्वभावाः घनीभूताः कठिनाश्च तैः, खलैर्दुर्जनैः धान्यमर्दनभूमिदेशैश्च। विधिसिद्धाः शास्त्रसिद्धाः, नैके अनेके, गुणाः सस्यसम्पद इव येषां ते तथोक्तास्तेषाम्; अन्यत्र विधिसिद्धाः भाग्यसिद्धाः नैकगुणाः सस्यसम्पदो धान्यानि येषां तेषां च, अलं प्रयोजनं नास्तीत्यर्थः, कृषिसंपादितधान्यानामेव खलापेक्षा नान्येषामिति भावः। निषेधक्रियां प्रति करणत्वात् खलैरिति करणे तृतीया ॥ ११ ॥

पुनश्चेदृशस्वभावाः खला इत्याह—

मुक्ताहारनिषेविता अपि न तद्भृत्यै दिशन्त्यन्तरं
बन्धे गाढविमर्दनेऽपि न जहत्यन्योन्यसंपीडनम् ।

उष्णे शीतलतामुपेत्य शिशिरे प्राप्ते भजन्त्युष्णतां
कामान्तःपुरचेटिकाकुचतटीकाठिन्यवन्तः खलाः ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य
कृतिषु सुभाषितनीव्यां
खलपद्धतिः
तृतीया ॥

मुक्ताहारेति ॥ कामान्तःपुरचेटिकानां मन्मथान्तःपुरस्त्रीणाम्, कुचतटीनां यत्काठिन्यं, तद्वन्तः, तादृशकाठिन्यवन्त इत्यर्थः ; अतिकाठिन्यद्योतनाय कामान्तःपुरेति विशेषणं, तासामतिसौन्दर्येणातिकठिनकुचवत्त्वादिदमतिशयोक्तिरूपम्। खलाः दुर्जनाः, मुक्ताहारैः मुक्तजीवनैः अविद्यमानजीवनैः, निषेविता अपि, तद्वृत्त्यै तज्जीवनाय, अन्तरं अवकाशम्, न दिशन्ति; कुचाश्च मौक्तिकहारैर्निषेविताः तद्वृत्त्यै मुक्ताहारस्थित्यै, अन्तरं स्थानम्, न दिशन्ति, परस्परश्लिष्टत्वादिति भावः। बन्धे कारागृहादिबन्धने, गाढविमर्दने जानुभिर्मुष्टिभिः सम्यक्ताडनेऽपि, अन्यत्र कञ्चुकबन्धने करविमर्दने च, अन्योन्यसंपीडनं परस्परोपद्रवकरणं परस्परसंघर्षणं च न त्यजन्ति । उष्णे स्वापेक्षयाऽधिकबले ग्रीष्मकाले च, शीतलतां सौम्यतां शैत्यं च, उपेत्य, शिशिरे सौम्ये शीतकाले च, उष्णतां क्रूरहृदयत्वं औष्ण्यं च भजन्ति ; 'कूपोदकं

वटच्छाया नारीपीनपयोधरौ । शीतकाले भवेदुष्णमुष्णकाले च शीत लम् ॥' इत्युक्तेः । अत्र कुचतटीकाठिन्यवन्त इति निदर्शनयान्य-धर्मस्यान्यत्रासंभवादौपम्यमाक्षिप्यते । सर्वैर्वाक्यैः श्लेषमूलकाभेदाति-शयोक्तिगर्भैः निदर्शनागर्भैश्च कुचौपम्यं ध्वन्यते ॥ १२ ॥

इति श्रीमच्छ्रीशैलकुलतिलकस्य वेङ्कटाचार्यसोमसुतः सुतस्य
श्रीश्रीनिवासविदुषः कृतिषु सुभाषितनीवी-
व्याख्यायां रत्नपेटिकाख्यायां
खलपद्धतिः
तृतीया ॥



दुर्वृत्तपद्धतिः ॥

'आचारहीनं न पुनन्ति वेदा यद्यप्यधीताः सह षड्भिरङ्गैः । छन्दांस्येनं विजहत्यन्तकाले नीडं शकुन्ता इव जातपक्षाः,' 'न विद्यया केवलया तपसा वापि पात्रता । यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते ॥', 'सर्वागमानामाचारः प्रथमं परिकल्प्यते,' 'कुलमाचारकर्मणा' इत्यादिभिर्वृत्तस्यावश्यकत्वमभिप्रेत्याह—

गुणजालप्रकर्षेऽपि धीवरत्वेऽपि जन्मतः ।
सर्वतीर्थावगाहेऽपि नीचवृत्तिर्न शस्यते ॥ १ ॥

गुणजालेति ॥ गुणजालानां गुणसमूहानां प्रकर्षेऽपि गुणयुक्तानायानामाधिक्येऽपि; 'जालं समूह आनाये' इत्यमरः । जन्मतः जन्मप्रभृतीत्यर्थः, धीवरत्वेऽपि बुद्ध्या श्रेष्ठत्वेऽपि; जन्मतः जात्या कैवर्तत्वेऽपि, 'कैवर्ते दाशधीवरौ' इत्यमरः । सर्वतीर्थेषु सर्वपुण्योदकेषु अवगाहेऽपि जलावतारस्थानेषु अवगाहनेऽपि, 'निपानागमयोस्तीर्थमृषिजुष्टजले गुरौ' इत्यमरः । नीचवृत्तिः निकृष्टाचारः निम्नदेशस्थितिश्च, कैवर्तानां मत्स्यग्रहणाय निम्नदेशस्थितत्वात्; न शस्यते न स्तूयते, अतिशयावहं न भवतीत्यर्थः । अत्र कैवर्तसाम्यध्वनिः ॥ १ ॥

द्विजराजाङ्कसंस्थोऽपि सन्मार्गाचारवानपि ।
विशुद्धिरहितः कश्चिन्न विन्दत्यकलङ्कताम् ॥ २ ॥

द्विजेति ।। द्विजराजाङ्के ब्राह्मणश्रेष्ठसमीपे, संस्था स्थितिर्यस्य स तथोक्तः ; 'अङ्कः स्थानान्तिकामर्षरूपकोत्सङ्कलक्ष्मसु' इति विश्वः, 'संस्थाऽचारे स्थितौ मृतौ' इत्यमरः । यद्वा द्विजराजाङ्के संतिष्ठत इति संस्थः, सुपि स्थ इति कः । सन्मार्गाचारवानपि, स्पष्टं ; अन्यत्र चन्द्रोत्सङ्गवर्त्यपि ; सन्मार्गे नक्षत्रमार्गे, आ समन्ताच्चारवान् संचारवानित्यर्थः । विशुद्धिरहितः परिशुद्धिरहितः कश्चित्, न विद्यते कलङ्कोऽपवादो यस्य तस्य भावस्तत्ता ताम्, अन्यत्र अचिह्नरूपत्वं ; 'कलङ्कोऽङ्कापवादयोः' इत्यमरः । न विन्दति न प्राप्नोति, सापवादत्वमेव प्राप्नोतीत्यर्थः ॥ २ ॥

सरलहृदयोऽपि तारकमन्त्रोपासकोऽपि, परिपूर्णप्रियभाग्योऽपि, शुभाचारं परित्यज्य, नरकपतनमेव भजतीति—'गोभिः पशुभिरश्वैश्च कृष्या च सुसमृद्धया । कुलानि न प्ररोहन्ति यानि हीनानि वृत्ततः । वृत्तं यत्नेन संरक्षेद्वित्तमेति च याति च । अक्षीणो वृत्ततः क्षीणो वृत्ततस्तु हतो हतः ।' इत्युक्तरीत्याह—

अवक्रस्तारकाधीशः परिपूर्णप्रियोदयः ।
प्राचीं दिशमतिक्रम्य पतनं प्रतिपद्यते ॥ ३ ॥

अवक्र इति ।। प्राचीं दिशं शुभाचारं, पूर्वककुभं च ॥

दुराचाराणां श्रेष्ठब्राह्मण्यादिजातियोगोऽपि प्रत्यवायभूयस्त्वायेत्याह—

पततां हन्त केषांचिद्भजते मलिनात्मनाम् ।
विशुद्धवर्णयोगोऽपि विपरीतनिमित्तताम् ॥ ४ ॥

पतताम्इति ॥ मलिनात्मनां दुराचाराणां, अत एव पततां, द्विजातिकर्मभ्यो हानिः पतनं तद्वताम्; विशुद्धवर्णयोगः ब्राह्मणजातियोगः, विपरीतनिमित्ततां अत्यन्तनिकृष्टताहेतुताम्, भजते । यथा मलिनात्मनां श्यामवर्णानां पततां वृक्षेभ्यः स्रंसतां केषांचित्पत्राणामित्यर्थः, विशुद्धवर्णयोगः पाण्डुत्वयोगः, विपरीतनिमित्ततां पाण्डुपत्रविरुद्धकिसलयादिनिमित्ततां भजते— इति पत्रसमाधिः । पततां स्कन्धफालादिदेशे पतनवतां, मलिनात्मनां शिरोरुहाणां, विशुद्धवर्णयोगो जराशौक्ल्यं, विपरीतनिमित्ततां वृद्धताज्ञापनद्वारा मरणज्ञापकताम्, भजते इति शिरोरुहसमाधिर्वा बोध्यः ॥ ४ ॥

दुराचारोऽपि प्रायश्चित्तेन शुद्धश्चेत् केनाप्यनुगृह्यत इत्याह—

पतनानन्तरं कृच्छ्रात्प्ररूढः शुद्धिमानपि ।
द्विजः संछाद्यते कश्चिदधरेणापि रागिणा ॥ ५ ॥

पतनेति ॥ द्विजातिकर्मभ्यो हानिः पतनं तदनन्तरम्, कृच्छ्रात् कृच्छ्रादिप्रायश्चित्तात्, प्ररूढः पुनर्द्विजत्वापादकसंस्कारैरुत्पन्नः, अत एव शुद्धिमान्, द्विजोऽपि कश्चित्, रागिणा प्रीतिमता, अधरेणापि, शास्त्राभिज्ञेनानुगृह्यत एव, तदनभिज्ञेन पामरेणापीत्यपिशब्दार्थः । संछाद्यते, पतितोऽयमिति न प्रकाश्यत इत्यर्थः । 'गुणदोषौ बुधो गृह्णन् इन्दुक्ष्वेलाविवेश्वरः । शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति' इति

दोषोद्घाटनस्यानुचितत्वात्सहृदयस्येति भावः। दन्तसमाधिरत्र गम्यते, द्विजो दन्तः, 'दन्तविप्राण्डजा द्विजाः' इत्यमरः। कृछ्रात् अतिप्रयासात्, प्ररूढः उत्पन्नः, अधरेण अधरोष्ठेन; शेषं स्पष्टम् ॥ ५ ॥

कश्चिदुदरपोषणार्थं परिशुद्ध इवाभिनयन् डाम्भिको भवति, तादृशैः 'हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्' इति संभाषणादिकमपि न कुर्यादित्यभिप्रेत्याह—

जोषमेकपदे स्थित्वा संनिकृष्टान्क्षणाद्घसन्।
बहिर्दर्शितसंशुद्धिर्बकोऽप्याहारमर्हति ॥ ६ ॥

जोषमिति ॥ बहिर्दर्शितसंशुद्धिः स्नानादिना वैशिष्ट्यमभिनयन्नित्यर्थः; एकपदे एकचरणे, जोषं मौनेनान्वितः, स्थित्वा योगं कुर्वाण इव, मौनमाश्रित्यैकपादेन स्थित्वेत्यर्थः। सन्निकृष्टान् यैः कैश्चिदयं महान्योगीति भक्त्या समर्पितान् उपहारान् क्षणादविलंबेन घसन् गृह्णन्, बकोऽपि बकब्राह्मणोऽपि, आहारमर्हति आहारं लब्धुं योग्यो भवतीत्यर्थः; तादृशनिकृष्टवृत्त्यापि स्वोदरपूरणमेव, न परसंरक्षणमित्यभिप्रायेणाहारमर्हतीत्युक्तम्। 'यस्मिन् जीवति जीवन्ति बहवः स तु जीवति। बकोऽपि किं न कुरुते चंच्वा स्वोदरपूरणम्' इत्यपिशब्देन ज्ञापितम्। अत्र बकसमाधिः; सन्निकृष्टान् मत्स्यादीन्; एकपदे युगपत्; अव्ययमेतत्; घसन् भक्षयन् ॥ ६ ॥

द्विजस्य परिशुद्धसहायस्य पण्डितस्यापि समीचीनव्यवहारः समीचीनवाक् समीचीनजीवनं च विद्यते चेत् शिष्टैः सह शिष्टत्वेन

संव्यवहारो भवेत्; नो चेद्बहिष्कार्यतैवेत्यभिप्रायेणाह—

द्विजस्य सितपक्षस्य कवेरपि निरस्यते ।
न हंस इति साजात्यं गतिशब्दितवृत्तिभिः ॥ ७ ॥

द्विजस्येति ॥ मातृगर्भादण्डरूपेण जननं, पुनरण्डात्करचरणादिविशिष्टरूपेण जननमिति द्विजस्य, सितपक्षस्य श्वेतगरुतः, के उदके संचरन् विः पक्षी कविः, तस्यापि गतिशब्दितवृत्तिभिः हंस इति साजात्यं न निरस्यते, हंसस्य हंसान्तरेण साजात्यं, गतिशब्दितवृत्तिभिः एकस्य हंसस्य यादृशी गतिर्यादृशः शब्दो यादृशी जीविका तादृशमन्यस्याप्यस्ति चेत् हंस इत्युच्यते, न द्विजत्वसितपक्षत्वकवित्वैः, द्विजस्य सितपक्षस्य कवेर्वकस्य तादृशगतिशब्दितवृत्त्यभावेन हंसत्वाभावादिति भावः । अप्रस्तुतप्रशंसालंकारः ॥ ७ ॥

विरुद्धाचाराणां आशीरपि न श्रेयःसाधनमित्याह—

अव्यवस्थितवृत्तानामभिन्नश्रुतिचक्षुषाम् ।
अधर्मार्जितभोगानामाशीरप्यहितोचिता ॥ ८ ॥

अव्यवस्थितेति ॥ "अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्, ये तत्र ब्राह्मणाः संमर्शिनः, युक्ता आयुक्ताः, अलूक्षा धर्मकामाः स्युः, यथा ते तत्र वर्तेरन्, तथा तत्र वर्तेथाः"— इत्युपदेशमार्गं विहायाव्यवस्थितचरित्राणां; अभिन्नः जीवात्मना एकीभूतः, श्रुतिचक्षुः परमात्मा, येषां ते तथोक्ता-

स्तेषाम्; 'वेदचक्षुः सनातनः' इत्युक्तेः श्रुतिचक्षुःशब्दस्य परमात्मपरत्वम्। यद्वा अभिन्नमविचारितं श्रुतिचक्षुः चक्षुःसदृशश्रुतियैस्ते तथोक्तास्तेषाम्; 'श्रुतिस्मृती तु विप्राणां चक्षुषी द्वे विनिर्मिते' इत्युक्तेः श्रुतेश्चक्षुःसदृशत्वं, अधर्मेण धर्मभिन्नेन काम्यकर्मणा, अनभिसंहितफलो भगवत्प्रीणनैकप्रयोजनतया अनुष्ठीयमानः शास्त्रविहितो धर्मः, तद्भिन्नोऽधर्म एव; धर्मेण पापमपनुदतीत्यत्राभिसंहितफलस्य धर्मस्यापि पापत्वाभिधानात्। आर्जितः भोगः स्वर्गाद्यनुभवो येषां ते तथोक्तास्तेषामाशीरपि अहितोचिता हितोचिता न भवति, श्रेयःसाधनाय न समर्थेत्यर्थः। अत्र निदर्शनं—अविषु पर्वतेषु अवस्थिता वृत्ता वर्तुलाश्च तेषां, अभिन्नश्रुतिचक्षुषां चक्षुरश्रवत्स्वात् अधर्माय परहिंसायै आर्जितः भोगः शरीरं येषां तेषाम्; सर्पाणामित्यर्थः। 'अहेः शरीरं भोगः स्यात्' इति निघण्टुः; आशीर्दंष्ट्रापि, अहितायाः सर्पत्वस्य उचिता योग्या, 'आशीरुरगदंष्ट्रायां शुभवाक्याभिलाषयोः' इति विश्वः ॥ ८ ॥

असद्वृत्तेरारोपमात्रेणापि मान्यो न भवतीत्याह—

दुष्टैरारोपितः कश्चिदनर्थक्रिययान्वितः।
असत्कारेण गृह्येत विरुद्धाकारवेदिभिः ॥ ९ ॥

दुष्टैरारोपित इति ॥ दुष्टैः दुर्जनैः अनर्थक्रियया अनर्थहेतुव्यापारेणान्वितः सन्नारोपितः कश्चित् विरुद्धाकारवेदिभिः आरोपिताकारज्ञैः असत्कारेण अबहुमानेन गृह्येत, दुष्टैर्दोषयुक्तैरिन्द्रियैः, अनर्थक्रियया

कटकमकुटाद्यर्थक्रियाभावेन, 'क्वचित्तदभावेऽपि नञ्समास इष्यते' इति ; अन्वितः कश्चिदारोपितो रजतादिः; विरुद्धाकारवेदिभिः शुक्तिस्वरूपज्ञैः, रजतभाववेलायां सत्त्वेन गृहीतोऽपि शुक्तित्व-ग्रहणदशायां, रजतादिरर्थोऽसत्कारेणासद्भावेन, गृह्येतेति । प्राति-भासिकरजतादिरत्र निदर्शनम् ॥ ९ ॥

वृत्त्या मलिनो राज्ञा मित्रेणापि दण्ड्यो भवतीत्याह—

तमः स्वभावमलिनं वृत्त्यालोकोज्झिताश्रयम् ।
दण्ड्यं मित्रेण राज्ञा च दृष्टदोषान्वयं विदुः ॥ १० ॥

तम इति ॥ वृत्त्या हेतुना आलोकेन प्रकाशेन लोकेन च, उज्झित आश्रयो यस्य तथोक्तम्, दृष्टः दोषायां रात्रौ अन्वयो यस्य तत् । दोषापदं रात्रिवाचकमव्ययमिति अमरसिंहादिभिरुक्तम्; अन्ये तु 'ततः कथाभिः समतीत्य दोषामारुह्य सैन्यैः सह पुष्पकं ते' इति भट्टिप्रयोगादनव्ययमप्याहुः । अन्यत्र दृष्टः दोषाणामन्वयो यस्येति बोध्यम् । स्वभावमलिनं तमः, मित्रेण सूर्येण आप्तेन च, राज्ञा चन्द्रेण च नृपेण च, 'राजा प्रभौ नृपे चन्द्रे' इत्यमरः । दण्ड्यं—निवर्त्यं, अन्यत्र शिक्षणीयं, विदुः । श्लेषनिबन्धनोऽयमप्रस्तुतप्रशंसालंकारः ॥

दुर्जनाः स्वयं दुर्वृत्ताः सन्तः सद्वृत्तानेव लज्जापयन्तीत्याह—

जातिमात्रशरणा बहिष्कृताः
केचिदाहतजघन्यवृत्तयः ।

रोषणा विपरिधाविनो मुहु-
र्हेपयन्ति जनमुज्झितह्रियः ॥ ११ ॥

जातिमात्रेति। जातिमात्रमेव शरणं रक्षणोपायो येषां ते तथोक्ताः, मात्रचा तदुचितकर्मादयो व्यवच्छिद्यन्ते, अन्यत्र जातिः चुल्ली, 'जातिर्जातिफले धान्यां चुल्लीकंपिल्लयोरपि' इति विश्वः। तदेव तन्मात्रं शरणं स्थानं येषां तेषामित्यर्थः। बहिष्कृताः सद्भिः निरस्ताः बहिर्देश एव स्थापिताश्च; 'नित्यं समासेऽनुत्तरपदस्थस्य' इति षत्वम्। आहता जघन्यवृत्तिनींचवृत्तिश्च येषां ते तथोक्ताः, जघन्यं चरमे शिश्ने जघन्यं गर्हितेऽन्यवदिति विश्वः। रोषणाः क्रोधाविष्टाः, नन्द्यादित्वाल्ल्युः। मुहुर्विशेषेण; कलहार्थं, नूतनजनाप्रवेशार्थं च अभिमुखं धावन्तीति विपरिधाविनः, ऊज्झितह्रियः स्वयंगर्हितवृत्तय इति, लज्जारहिताः केचिद्दुर्जनाः शुनकाश्च जनं हेपयन्ति; स्वदर्शनेन जनः स्वयमेव यथा लज्जायुक्तो गच्छेत् तथा कुर्वन्तीत्यर्थः। ह्री ल जायामित्यस्माण्णिचि अर्तिह्री इत्यादिना पुगागमे पुगन्तलघूपधस्येति गुणे हेपयन्तीति रूपम्। शुनकसाम्यं प्रतीयते ॥ ११ ॥


क्षुद्रनिषिद्धविषयाभिलाषः सद्बुद्धिं प्रतिक्षिपतीत्याह---

आलोकावधि यद्वशेन सुगतिं विन्दन्ति भूतान्यसौ
दृष्टिस्नेहवशेन सा वितनुते वंशे भुजंगभ्रमम्।
दक्षा भोगिषु केषुचिद्विषमितां दृष्टिं निहन्तुं क्षणा-
त्तानप्याशु विनाशयेत्क्षणरुचिः काचित्क्षणस्फूर्जथुः ॥

आलोकेति ॥ अलोकावधि आलोको यावति देशे वर्तते तावत्पर्यन्तम्, भूतानि यद्वशेन यद्दृष्टिवशेन, सुगतिं शोभनगमनं विन्दन्ति । लोकावधिमभिव्याप्य स्थितानि भूतानि यत्सत्यज्ञानेन सुगतिं सद्गतिं विन्दन्ति इति प्रतीयते । असौ दृष्टिः, तत्त्वबुद्धिश्च 'दृष्टिर्ज्ञानेऽक्षिणि दर्शने' इत्यमरः । स्नेहवशेन रागवशेन मण्डूकवसाद्यञ्जनविशेषेण, वंशे वेणौ भुजङ्गभ्रमं वितनुते भुजङ्गभ्रमं जनयति; वंशोरगभ्रमे मण्डूकवसाञ्जनं दोष इत्याहुः । स्नेहवशेन रागवशेन, वंशे जनवर्गे, भुजंगभ्रमं विटभ्रान्तिं, 'वंशे वेणौ कुले वर्गे' इत्युभयत्रापि विश्वः, वितनुते । भोगिषु सर्पेषु, भोगवत्सु च, विषं इतां प्राप्तां विषमितां, विषमिश्रां; विषमीकृतां, दृष्टिं क्षणान्निहन्तुं दक्षाः सन्तीति शेषः; तामपि दृष्टिं क्षणस्फूर्जथुः क्षणं क्षणमात्रं स्फूर्जथुः वज्रसङ्घर्षशब्दो यस्याः सा; क्षणरुचिः विद्युत्काचित् आशु विनाशयेत् । वज्रपतनकालिकी विद्युत् दृष्टेरत्यन्तप्रतिबन्धकेति भावः । 'टुओस्फूर्जा वज्रनिर्घोषे' इत्यस्मात् ट्वितो थुजिति अथुच् ॥ १२ ॥

इति श्रीमच्छ्रीशैलकुलतिलकस्य वेङ्कटाचार्यसोमसुतः सुतस्य
श्रीश्रीनिवासविदुषः कृतिषु सुभाषितनीवी-
व्याख्यायां रत्नपेटिकाख्यायां
दुर्वृत्तपद्धतिः
चतुर्थी ॥

असेव्यपद्धतिः ॥



कठिनः कृशमूलश्च दुर्लभो दक्षिणेतरः ।
कश्चित्कल्याणगात्रोऽपि मनुष्यैर्नोपजीव्यते ॥ १ ॥

कठिन इति ॥ कठिनो निर्दयः, कृशमूलः निर्धनः, मेरुस्तु मूले कृशः उपरि विस्तीर्णश्च, दक्षिणेतरः अनुदारः, भुवो मध्यदेशवर्तित्वाद्दक्षिणदिग्भागवर्ती, पर्वतेभ्य इतरश्च, 'दक्षिणस्सरलो वामपद्यच्छन्दानुवर्तिषु' इति विश्वः । 'दक्षिणे सरलोदारः' इत्यमरः । कल्याणगात्रः शुभाकृतिरपि सुवर्णमयशरीरोऽपि; 'कल्याणमक्षये स्वर्णे कल्याणं मङ्गलेऽपि च' इति विश्वः । कश्चित् पुरुषो मेरुश्च मनुष्यैर्नोपजीव्यते एकत्र व्यर्थत्वादन्यत्रासाध्यत्वादिति भावः ॥ १ ॥

दृष्टपङ्का प्रतिपदं स्यादल्पसरसः स्थितिः ।
काले घनरसैर्योगेऽप्यसेव्या जीवितार्थिभिः ॥ २ ॥

दृष्टपङ्केति ॥ प्रतिपदं दृष्टपङ्का ग्रीष्मे दृष्टकर्दमा दृष्टदोषा च; काले वर्षाकाले कार्यकाले च; घनरसैर्योगेऽपि, अल्पसरसः स्थितिः क्षुद्रकासारस्थितिरल्पपुरुषस्थितिश्च ; जीवितार्थिभिः प्राणार्थिभिः जीवनार्थिभिश्च, असेव्या स्यात् । 'उत्तमानेव सेवेत प्राप्तकाले तु मध्यमान्' इति धृतराष्ट्रप्रजागरे उक्तत्वात् काले घनरसैर्योगेऽपीत्युक्तम् ॥

यस्य यत्सत्ता स्वरूपविरुद्धा, तयोः कदापि न संबन्ध इत्याह—

सतः सत्त्वविहीनानां सत्तयैवापराध्यतः ।
कथंकारं प्रतीकारः कल्पकोटिशतैरपि ॥ ३ ॥

सत इति ॥ सत्त्वविहीनानां सत्त्वगुणरहितानां तामसादीनां विद्यमानतारहितानां च; सत्तया साधुभावेनैव, विद्यमानतयैव च; अपराध्यतः सतः; सत्तैव तेजसस्तिमिरस्य विरुद्धा, प्रतीकारः विरोधपरिहारः, कल्पकोटिशतैरपि, कथंकारं कथंचिदित्यर्थः, अन्यथैवं कथमित्थं सुसिद्धाप्रयोगश्चेदिति कथमित्युपपदे स्वार्थे कृञि णमुल् ॥ ३ ॥

अपि संतापशमनाः शुद्धाः सुरभिशीतलाः ।
भुजंगसंगाज्जायन्ते भीषणाश्चन्दनद्रुमाः ॥ ४ ॥

अपीति ॥ स्पष्टम् 'मुखेन गरलं मुञ्चन् मूले यदि महोरगः । फलसन्दोहगुरुणा तरुणा किं प्रयोजनम् ॥' 'सुपुष्पितः सारफलः फलितः स्याद्दुरासदः । अपक्वः पक्वसङ्काशः स च शीर्येत कर्हिचित्' इत्यादि स्मारितम् ॥ ४ ॥

नीचानुसरणान्मन्ये निसर्गपरिशुद्धयोः ।
गतिः कुटिलतां याति गङ्गायमुनयोरपि ॥ ५ ॥

नीचेति ॥ नीचानुसरणात् नीचसेवनात्, उन्नतभूमेर्निम्नदेशे प्रवहनाच्च, गतिर्बुद्धिर्गमनं च, 'गतिस्तु गमने मार्गे दशायां बुद्ध्युपाय-

योः' इति निघण्टुः। शेषं स्पष्टम्। मन्ये—इति निपातप्रतिरूपकमव्ययमिति भोजराजः। 'अधमांस्तु न सेवेत य इच्छेद्भूतिमात्मनः। यदि सन्तं हि सेवेत यद्यसन्तं तपस्विनम्॥' 'वासो यथा रागवशं प्रयाति तथा स तेषां वशमभ्युपैति' इत्यादि स्मारितम्॥ ५॥

मित्रे भवति वैमुख्यं मैत्री दोषाकरेण च।
अपि तीर्थप्रसूतानां कैरवाणां रजोभृताम्॥ ६॥

मित्र इति॥ तीर्थप्रसूताना योग्यादुत्पन्नानाम्, जलावतारोत्पन्नानां च; रजोभृतां रजोगुणवतां, परागवतां च; कैरवाणां शठानां कुमुदानां च; मित्रे सख्यौ सूर्ये च; वैमुख्यं भवति दोषाकरेण पापात्मना चन्द्रेण च; मैत्री भवति। अतो न सेव्या इति भावः। नन्वसेव्यत्वे कैरवाणि न निदर्शनमिति चेन्न; रजोभृतां मित्रवैमुख्यादिके निदर्शनेन समर्थिते सति तेषामसेव्यत्वसिद्धेः॥ ६॥

अपि निर्मुक्तभोगेन स्वान्तःस्थविषयेक्षया।
असद्भावाय जायेत जिह्मगेन सहासिका॥ ७॥

अपीति॥ निर्मुक्तस्त्यक्तो भोगो येन तेनापि; निर्मुक्तो मुक्तकञ्चुको भोगः शरीरं यस्य तेन च तथोक्तेन; जिह्मगेन कुटिलवृत्तिना सर्पेण च; सहासिका सहावस्थानम्, धात्वर्थनिर्देशे ण्वुल् वक्तव्य इति ण्वुल्; स्वान्तःस्थाः मनःस्थिता अभिलषिता ये विषयाः भोग्यपदार्थाः, स्वान्ते स्वस्यान्ते समीपे, तिष्ठन्तीति तथोक्ताः; ते च ते विषयास्तेषामीक्षया दृष्ट्या; स्वस्य अन्तस्तिष्ठतीत्यन्तःस्थं विषं यस्यास्सा

तथोक्ता तया, विषगर्भया ; ईक्षया दृष्ट्या च, असद्भावाय दुष्टत्वाय, नाशाय; जायेत । अतो विषयभोगलम्पटेन सह वासो न कार्य इति भावः ॥ ७ ॥

मण्डूकराविणं सर्पं गोमुखं च मृगादिनम् ।
न सुहृत्त्वेन मन्येत मानयन्तं च वैरिणम् ॥ ८ ॥

मण्डूकेति ॥ मण्डूक इव रौतीति मण्डूकरावी तं, कर्तर्युपमान इति णिनिः, सर्पं, सर्पजातिषु तादृशः कश्चित्सर्पोऽस्ति, गोमुखं तादृशमुखयुक्तम् ; मृगादिनं व्याघ्रम्, व्याघ्रजातिषु तादृशः कश्चिदस्ति; तं दृष्ट्वा तादृशोऽयमिति न विश्वसेदित्यर्थः । मानयन्तं वैरिणं च, सुहृत्त्वेन शोभनहृदयत्वेन मित्रत्वेन च, न मन्येत । 'वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः' इत्युक्तदीपकालंकारः ॥ 'न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् । विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति' इति नीतिविदः ॥ ८ ॥

घोरास्त्यक्तमिथोवैराः सौकर्यवदुपद्रवे ।
दण्डेनापि न भज्येरन्पापकुण्डलिमण्डलाः ॥ ९ ॥

घोरा इति । घोराः क्रूराः, पापाः कुण्डलिमण्डलाः सर्पसमूहा इव तथोक्ताः; सौकर्यं सुकरत्वं अस्यास्तीति सौकर्यवान्, सुलभ इति यावत्; तादृशे उपद्रवे अल्पोपद्रवेऽपीत्यर्थः । सौकर्यं सूकरभावः, तदेषामस्तीति तद्वन्तो वराहाः । 'सौकर्यं स्यादनायासे सूकरस्य च कर्मणि' इति विश्वः । तेषामुपद्रवे तत्कर्तृकोपद्रवे, ते हि

वल्मीकानि खनन्ति, त्यक्तमिथोवैराः सन्तः सङ्घीभूय पलायमानाः सन्तः दण्डेनापि न भज्येरन्, भग्ना न क्रियेरन्, 'स्यान्मण्डलं द्वादशराजके च देशे च बिम्बे च कदम्बके च। कुष्ठप्रभेदेऽप्युपसूर्यके च भुजङ्गभेदे शुनि मण्डलः स्यात्' 'बिम्बोऽस्त्री मण्डलं त्रिषु' इति पुल्लिंगता ॥

अनाकलितमानुष्याः क्षमासंस्पर्शवर्जिताः ।
प्रतिबुद्धैर्न सेव्यन्ते पूर्वदेवविरोधिनः ॥ १० ॥

अनाकलितेति। अनाकलितमगृहीतं, मानुष्यं मनुष्यकर्म, येषां ते तथोक्ताः, पिशाचव्यापारवन्त इत्यर्थः; गुणवचनब्राह्मणादिभ्यः कर्मणि चेति ष्यञ् प्रत्ययः। ब्राह्मणादिराकृतिगण इत्युक्तम्। अनाकलितमप्राप्तं मानुष्यं मनुष्यभावो मनुष्यत्वं येषां ते तथोक्ता इति च। क्षमासंस्पर्शेन क्षमागुणसंस्पर्शेन च भूतलसंस्पर्शेन च वर्जिताः; पूर्वं देवविरोधिनो देवद्वेषिणः पश्चात् ब्राह्मणद्वेषिणश्च; प्रतिबुद्धैः बुद्धिमद्भिः न सेव्यन्ते नाश्रीयन्ते। पूर्वदेवा राक्षसाः, तद्विरोधिनो देवाः, प्रतिबुद्धैर्मोक्षार्थिभिः, न सेव्यन्ते; 'ब्रह्माणं शितिकण्ठं च याश्चान्या देवताः स्मृताः। प्रतिबुद्धा न सेवन्ते यस्मात् परिमितं फलम्' इत्युक्तेः ॥ यथा मोक्षकामैरन्यदेवता न सेव्यन्ते, दूरं परिहियन्ते, एवं बुद्धिमद्भिः दुर्जना न प्राप्या इत्यर्थः ॥ १० ॥

परिक्षीणाचारस्य श्रुतमपि विदुषोऽतिक्रमे दण्डभूयस्त्वहेतुत्वादधिकानर्थं संपादयतीति सदृष्टान्तमाह—

अमित्रे विश्वासः श्वपचकरके सौमिकरसः
कपाले गङ्गाम्भः खलपरिषदङ्के सुजनता ।
परिक्षीणाचारे श्रुतमनुपनीते च निगमः
स्वतःसिद्धां शुद्धिं त्यजति विपरीतं च फलति ॥११॥

अमित्र इति । श्वपचानां चण्डालानां, करकं पात्रविशेषः, तस्मिन्; सौमिकरसः देवतासमर्पितावशिष्टः सोमरसः, जनानां समूहो जनता, शोभना चासौ जनता च सुजनता, ग्रामजनबन्धुभ्यस्तलिति समूहार्थे तल्प्रत्ययः । स्पष्टमन्यत् ॥ ११ ॥

राजगृहं द्रव्यचौर्याद्यारोपणादिभिर्दण्डहेतुत्वादसेव्यमित्याह—

तरतु विवित्सयाब्धिमधिरोहतु शैलतटं
धमतु च धातुवर्गमधिगच्छतु शस्त्रमुखम् ।
तदिदमरुन्तुदं यदुत बह्ववधाय भिया
धनमदमेदुरक्षितिभृदङ्कणचङ्क्रमणम् ॥ १२ ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य
कृतिषु सुभाषितनीव्यां
असेव्यपद्धतिः
पञ्चमी ॥

तरत्विति ॥ विवित्सया धनलाभेच्छया, विद्लृ लाभ इत्यस्मात्सन्, अब्धिं तरतु, नावा देशान्तरं गच्छतु; कामचारे लोट्, ततोऽनिष्टं नास्तीत्यर्थः, धातुवर्गं अश्मविकारसमूहम्; सुवर्णीकरणाय धमतु च अग्नौ पुटपाकार्थं निक्षिप्य मुखेन वायुफूत्कारं करोतु; अधिगच्छतु शस्त्रमुखम्, तदपि शक्यमेवेति भावः; धनलाभाय खड्गप्रहारादिसहनात्। भिया भयेन, कुत्र को वापराधः स्यादिति भयेन बहु यथा भवति तथा अवधाय अप्रमादेन स्थित्वा; 'प्रमादोऽनवधानता' इत्यमरः। धनमदेन मेदुराणां क्षितिभृतां, अङ्गणे चङ्क्रमणं गृहे परिभ्रमणमित्यर्थः। यदुत तदिदमरुन्तुदं दुःखावहम्। उतेति निन्दाद्योतकम्; स्तब्धोऽस्युतेतिवत् ॥ १२ ॥

इति श्रीमच्छ्रीशैलकुलतिलकस्य वेङ्कटाचार्यसोमसुतः सुतस्य
श्रीश्रीनिवासविदुषः कृतिषु सुभाषितनीवी-
व्याख्यायां रत्नपेटिकाख्यायां
असेव्यपद्धतिः
पञ्चमी ॥

महापुरुषपद्धतिः ॥

एवमज्ञानमूलदोषविषयपद्धतीः प्रणीय अनन्तरं ज्ञानमूलगुणविषयपद्धतयः प्रणीताः। तत्र सकलगुणानामाश्रयत्वान्महापुरुषस्य महापुरुषपद्धतिः प्रथममुक्ता—

सतामेव खपुष्पत्वं येषां यत्सदसत्त्वयोः।
न जातु तस्य तत्ताभ्यामिति तेषां स विश्वदृक् ॥ १ ॥

सतामिति ॥ यत्सदसत्त्वयोः यस्य महापुरुषस्य सदसत्त्वयोः, येषां सतामेव, खपुष्पत्वं अप्रसिद्धत्वम्; सर्वज्ञस्य सत्त्वे इतरजनानामप्रसिद्धत्वम्, तदसत्त्वेऽपि सतामेव खपुष्पत्वं शून्यत्वम्। सन्मार्गप्रकाशकस्य महाजनस्याभावे सत्पुरुषदौर्लभ्यमित्यर्थः। जातु कदाचिदपि तस्य महापुरुषस्य तत्ताभ्यां तेषां सतां ताभ्यां सत्त्वासत्त्वाभ्याम्, न खपुष्पत्वं नास्तीत्यर्थः। सतां सत्त्वे सर्वज्ञस्याप्रसिद्धत्वं नास्ति, असत्त्वे च शून्यत्वं नास्तीति एवं तेषां सतां मध्ये, स विश्वदृक् सर्वज्ञः। अत्र निदर्शनम्—विश्वदृक् जगच्चक्षुः सूर्यः 'कर्मसाक्षी-जगच्चक्षुः' इत्युक्तेः। यत्सदसत्त्वयोः यस्य सूर्यस्य सदसत्त्वयोः, सतां नक्षत्राणामेव खपुष्पत्वं सत्त्वे ख शून्यं पुष्पं विकासो येषां तत्त्वम्; दिवा नक्षत्रसत्त्वेऽप्यस्फुरणात्। 'खमिन्द्रिये सुखे स्वर्गे शून्ये बिन्दौ विहायसि'। 'पुष्पं विकासे कुसुमे स्त्रीणां रजसि च स्मृतम्' इति

विश्वः ॥ असत्त्वे खे आकाशे पुष्पवत् स्थितत्वं रात्रौ तथाभानात्, जातु कदापि तस्य सूर्यस्य तत्ताभ्यां नक्षत्रसत्त्वासत्त्वाभ्यां, खपुष्पत्वं नास्तीति, तेषां नक्षत्राणां मध्ये, स विश्वदृक् जगच्चक्षुः । प्रकृताप्रकृतश्लेषः, तेनोपमालङ्कारो व्यज्यते ॥ १ ॥

महाजनः सतां नियमनेन शिष्टानां ब्राह्मणादीनां स्वसूत्रानुगुण्येन प्रवृत्तिं निवृत्तिं च न भिनत्तीत्याह—

सन्नियोगेन शिष्टानां वर्णादीनां स्वसूत्रतः ।
प्रवृत्तिं च निवृत्तिं च न भिन्द्यात्साधुशब्दवत् ॥ २ ॥

सन्नियोगेनेति ॥ स्वसूत्रतः आपस्तम्बादिसूत्रानुसारेण, व्याकरणसूत्रानुसारेण च, शिष्टानां सत्पुरुषाज्ञया शिक्षितानाम्, सहविहितानां च, वर्णादीनां ब्राह्मणादीनाम्; आदिशब्देनाश्रमादीनां ग्रहणम्; वनोरचेत्यादिना ङीबादिसन्नियोगेन शिष्टानां रेफादिवर्णानां च, साधुशब्दवत् साधुशब्दानामिव, तत्र तस्येति वतिप्रत्ययः । प्रवृत्तिं 'शाखाधीशे शक्तियुक्ते' इति बृहस्पतिमौढ्यादिषु प्रथमोपाकर्मादिषु प्रवृत्तिं शुक्रमौढ्यादिषु निवृत्तिं ङीबादिना सह रेफादीनां प्रवृत्तिं तदभावे तदभावं 'औत्वप्रतिषेधः साकच्कस्य वा वक्तव्यः साधुत्वं च' इत्यादिषु औत्वाद्यन्ते उत्वनिवृत्तिमित्यादिकं, न भिन्द्यात् महापुरुषो न निरुन्ध्यात्, अपि तु प्रवर्तयेत्; अर्हार्थे लिङ् अनाशीरर्थकत्वेन सार्वधातुकत्वात् श्नम् । यासुटो ङित्वात्; 'श्नसोरल्लोपः' इत्यल्लोपः । नकारमात्रस्य श्रवणम्, सन्नियोगविशिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिरिति न्यायोऽत्रानुसन्धेयः । उपमालङ्कारः ॥ २ ॥

विष्णुभक्तिमानेव महाजन इत्यभिप्रेत्याह—

मुक्तानुगुणवृत्तानां भजतां पावनीं गतिम् ।
नित्यं विष्णुपदे वृत्तिस्तारकाणां सितात्मनाम् ॥ ३ ॥

मुक्तेति ॥ मुक्तपुरुषानुरूपव्यापारवतां, मुक्तामणय इवानुसृतगुणानां वृत्तानां वर्तुलानां च, पावनीं पवित्रकारिणीम्, गतिम् उपायं प्रपत्तिम् भजतां, वायुसम्बन्धिमार्गमाश्रयताञ्च । 'गतिस्तु गमने मार्गे दशायां बुद्ध्युपाययोः' इति विश्वः । सितात्मनां परिशुद्धमनसां शुक्लरूपाणां च, तारकाणां संसारं तारयतां नक्षत्राणां च, 'कनीनिकायां नक्षत्रे तारकं तारकाऽपि च' इति विश्वप्रकाशे नपुंसकत्वमुक्तम् । नित्यं विष्णुपदे भगवत्पादे आकाशे च, वृत्तिः स्थितिः भवति ॥ ३ ॥

महाजनदर्शनं पापनिवर्तकमित्याह—

धर्मसेतुनिविष्टानामचलानां गरीयसाम् ।
दक्षिणोत्तरवृत्तीनां दृष्टिः पापनिवर्तिनी ॥ ४ ॥

धर्मेति ॥ धर्मसेतौ धर्ममर्यादायां निविष्टानाम् । 'द्वौ समुद्रौ वितताववजूर्यौ पर्यावर्तेते जठरेव पादाः । तयोः पश्यन्तो अतियन्त्यन्यमपश्यन्तः सेतुं नातियन्त्यन्यम्' इत्युक्तरामसेतौ निविष्टानां च; अचलानां स्थिरचित्तानाम्, दक्षिणाः समर्थाः उत्तरा उत्कृष्टा वृत्तिः वर्तनं येषां ते तथोक्ताः तेषाम्, गरीयसां महात्मनाम् । अचलपक्षे उत्तरदिग्भागमुपक्रम्य दक्षिणाभिमुखं स्थितानां गरीयसां अचलानां गन्धमादनप्रभृतिमहापर्वतानां दृष्टिः पापनिवर्तिनी ॥ ४ ॥

महात्मनां सम्पत्तिः सार्थकत्वादलंकार इत्याह—

अनङ्गीकृतकामानामनुमानार्हवर्ष्मणाम् ।
धृतनिर्मलतीर्थानां भूतिलेपो विभूषणम् ॥ ५ ॥

अनङ्गीकृतेति ॥ अनङ्गीकृतः अस्वीकृतः कामो विषयाभिलाषो यैः तेषां शरीररहितीकृतमन्मथानां च, अनुमानार्हवर्ष्मणां अनुमानशब्देन व्याप्तिमूलकत्वात्तर्क उच्यते, सत्तर्कानुगृहीतप्रत्यक्षानुमानागमानामित्यर्थः । अन्यत्र नार्हं अनर्हं, नञर्थस्य नशब्दस्य सुप्सुपेति समासः । उमाया नार्हं उमानार्हं तन्न भवतीत्यनुमानार्हम्, उमायोग्यमित्यर्थः; वर्ष्म देहः येषां ते तथोक्ताः तेषाम्, 'वर्ष्म देहप्रमाणयोः' इत्यमरः । धृतं निर्मलं तीर्थं शास्त्रं गङ्गा च यैः तेषां तथोक्तानाम्, 'तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु' इत्यमरः । भूतिलेपःसंपत्सम्बन्धः भस्मलेपश्च विभूषणम् । रुद्रसाम्यमुक्तम् ॥ ५ ॥

'जानाति विश्वासयितुं मनुष्यान् विज्ञातदोषेषु ददाति दण्डम् ।
जानाति *मात्रां च तथा क्षमाञ्च तं तादृशं श्रीर्जुषते समग्रा ॥'
इत्युक्तरीत्या महाजनस्यैव न्यायानुवर्तिनः सौख्यं भवतीत्याह—

अनन्तख्यातिसंपन्नः शुद्धसत्त्वः सधीबलः ।
धत्ते बहुमुखं भोगं श्रुतिदृष्टिस्थिराश्रयः ॥ ६ ॥

अनन्तख्यातीति ॥ अपरिमितकीर्तिसंपन्नः, अनन्त इति नामसंपन्नश्च; शुद्धसत्त्वः रजस्तमोऽनभिभूतसत्त्वगुणः, अधिकबलश्च,

* मात्रां विषयाणामनित्यत्वम् ।

मधीबलः बुद्धिबलयुक्तः, श्रुतिदृष्टिः भगवान् तस्मिन् स्थिरचित्तः, यद्वा श्रुतिदृष्टिरिति व्यस्तं पदम् 'श्रुतिस्मृती तु विप्राणां चक्षुषी द्वे विनिर्मिते' इत्युक्तरीत्या वेदार्थदर्शी। अन्यत्र चक्षुश्श्रवाः बहुमुखं भोगं सुखं सहस्रमुखं शरीरं च धत्ते। 'भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः' इत्यमरः। अत्र शेषसाम्यम् ॥ ६ ॥

महाजन एव सतां सेव्य इत्याह—

अहार्यः सर्वमध्यस्थः काञ्चनद्युतिमुद्वहन् ।
सत्प्रदक्षिणयोग्यत्वमुपयाति महोन्नतः ॥ ७ ॥

अहार्य इति ॥ अहार्यः कुदग्भिः प्रतारयितुमशक्यः, पर्वतश्च, 'अहार्यधरपर्वताः' इत्यमरः। सर्वमध्यस्थः अपक्षपाती सर्वभूमण्डलमध्यवर्ती च। कांचन अनिर्वाच्यां द्युतिं तेजः उद्वहन्, सुवर्णमयश्च, महोन्नतः सर्वोत्कृष्टः अत्युन्नतश्च, सतां सत्पुरुषाणां नक्षत्राणां च, प्रदक्षिणयोग्यत्वमुपयाति। अत्र मेरुपर्वतसाम्यम् ॥ ७ ॥

महात्मानो देवैरपि शिरसा प्रणम्यन्त इत्याह—

पुण्यगन्धाः सुमनसः प्रबुद्धाः समयागमे ।
शिरसा परिगृह्यन्ते सादरं त्रिदशैरपि ॥ ८ ॥

पुण्यगन्धा इति ॥ समयागमे सिद्धान्तशास्त्रे वसन्तादिकाले च, प्रबुद्धाः ज्ञानवन्तो विकसिताश्च, पुण्यगन्धाः पुण्यसंबन्धवन्तः मनोहरपरिमळाश्च 'गन्धो गन्धक आमोदे लेशे संबन्धगर्वयोः' इति विश्वः। 'यथा वृक्षस्य संपुष्पितस्य दूराद्गन्धो वात्येवं पुण्यस्य

कर्मणो दूराद्गन्धो वाति' इति श्रुतिः स्मारिता । सुमनसः ज्ञानिनः पुष्पाणि च 'सुमनाः पुष्पमालत्योः स्त्री देवबुधयोः पुमान्' इत्युभयत्रापि, त्रिदशैःदेवैरपि सादरं शिरसा परिगृह्यन्ते 'सर्वेऽस्मै देवा बलिमावहन्ति' इति श्रुतेः । अत्र पुष्पसाम्यम् ॥

'यश्चात्मनापत्रपते भृशं नरः सर्वस्य लोकस्य गुरुर्भवत्युत । अनन्ततेजाः सुमनाः समाहितः स्वतेजसा सूर्य इवावभासते ॥' इत्युक्तमहापुरुषे तदनुग्रहेण मन्दानामपि मैत्री भवतीत्याह—

अनुकर्तुमपह्नोतुमतिवर्तितुमीक्षितुम् ।
अशक्ये तेजसां पत्यौ मित्रतानुमतिक्षमा ॥ ९ ॥

अनुकर्तुमिति ॥ अनुकर्तुं सदृशीभवितुम्, अपह्नोतुं किमस्य माहात्म्यमिति निषेद्धुम्, सूर्य इति कश्चित्तेजस्वी अस्ति वेति निषेद्धुं च, अतिवर्तितुं निराकर्तुम् अतिलङ्घितुं च; केनापि सूर्यस्य पश्चाद्भागादृष्टेरिति भावः । ईक्षितुं क्षुद्राणां दर्शनं कर्तुं तेजसो दृष्टिप्रतिघातकत्वादवलोकितुं च, अशक्ये तेजसां पत्यौ तेजस्विनि पुरुषे सूर्ये च, मित्रता सुहृत्त्वं सूर्यत्वं च, अनुमतेः अनुज्ञायाः क्षमा अभ्युपगमयोग्या, अनुमतिः पूर्णिमाभेदः, 'कलाहीने सानुमतिः' इत्युक्तेः । तस्याः क्षमा सूर्यकिरणानामेव चन्द्रकलापूर्तिहेतुत्वात्, 'यमादित्या अंशुमाप्याययन्ति' इति श्रुतेः 'यत्रामुष्य सुधीभवन्ति किरणाः' इत्यादिप्रसिद्धेश्च । अत्र यादवः—'तासां शतानि चत्वारि रश्मीनां वृष्टिसर्जने । शतत्रयं हिमोत्सर्गे तावद्धर्मस्य सर्जने । आनन्दनाश्च मेघ्याश्च नूतनाः

पूतना इति । शतं शतं वृष्टिवहास्ताः सर्वा अमृताः स्त्रियः ॥' इति ॥ ९ ॥

क्षुद्रा एव क्षुद्राणां धर्षणीया न महान्त इत्याह—

अहितुण्डिकदृष्टीनामशेषा भोगिनः पदम् ।
न संवर्ताग्निसारथ्ये स्थाता यन्मुखमारुतः ॥ १० ॥

अहीति ॥ अहितुण्डिकदृष्टीनां व्यालग्राहिदृष्टीनाम्, मन्त्रौषधादिव्यापाराणामित्यर्थः, 'व्यालग्राह्यहितुण्डिकः' इत्यमरः । अशेषाः शेषभिन्नाः भोगिनः सर्पाः, पदं विषयः; यन्मुखमारुतः येषां सर्पाणां मुखमारुतः, संवर्ताग्निसारथ्ये प्रलयकालाग्निसहायभावे न स्थाता, ष्ठागतिनिवृत्तावित्यस्माल्लुट् । शेषमुखमारुतस्तु प्रलयकालाग्नेः सहायीभूय जगत् नाशयति, तादृशं शेषं कः परिभवेदिति भावः॥

अयोग्यघटनस्वभावोऽपि विधिः क्वचिद्योग्यघटनेन श्लाघनीयोऽपि भवतीत्याह—

गरुत्मति सुपक्षतां गिरिधुरंधरे धीरता-
मुदन्वति गभीरतामृतदीधितौ सौम्यताम् ।
विवस्वति च दीप्ततां विधिरुपादधानश्चिरा-
दनर्घगुणचित्रितं किमपि चित्रमासूत्रयत् ॥ ११ ॥

गरुत्मतीति ॥ गिरिधुरंधरे गिरिश्रेष्ठे । विधिः, अनर्घगुणैः सुपक्षत्वादिगुणैः, चित्रितं आश्चर्यविषयीकृतम्, किमपि चित्रं सज्जनाख्यालेख्यम्, आसूत्रयत् घटितवान् । एकैकं सद्गुणमन्यत्र विधायाभ्यसित्व,

सज्जनाख्यं चित्रं निर्मितवानित्यर्थः । चित्रमिति निगीर्याध्यवसायलक्षणातिशयोक्तेः श्लेषमूलाभेदाध्यवसायलक्षणातिशयोक्तेरङ्गमिति तयोः सङ्करः। अप्रस्तुतविधिस्तुत्या सज्जनस्तुतिर्गम्यत इति व्याजस्तुत्यलङ्कारः, तदङ्गं 'गरुत्मति सुपक्षतां' इत्यादिषु समालङ्कार इति सङ्करश्चेति तयोः सङ्करयोरपि सङ्करः ॥ ११ ॥

सज्जनेषु दारिद्र्यमस्ति चेत् तेषां किं न्यूनं ? 'तदभाग्यं धनस्यैव यन्नाश्रयति सज्जनम्' इति धनस्यैव वैयर्थ्यम् । ते तु, अतिचञ्चलाः संपदः, शान्तिसुखामृतनदीलीनाः सन्तो न श्लाघन्त इत्याह—

प्रशस्तिं विन्दन्ति प्रशमसुखदिव्यामृतसरि-
त्प्रलीना धन्यानां परिषदि न संपत्तिसरितः ।
अमित्रोपक्षेपक्षणविगलदात्मीयपृतना-
दृढामर्दत्रस्यद्भूमिडभटजङ्घाजवभृतः ॥ १२ ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य
कृतिषु सुभाषितनीव्यां
महापुरुषपद्धतिः
षष्ठी ॥

प्रशस्तिमिति ॥ 'शरीरपतनावधिप्रभुनिषेवणापादनादविन्धनधनक्षयप्रशमदं धनं दन्धनम् । धनक्षयविवर्धनं धनमुदूढगोवर्धनं

सुसाधनमबाधनं सुमनसां समाराधनम् ॥' इत्युक्तधनं लब्धारो धन्याः, धनगणं लब्धा इति यत्प्रत्ययः, तेषां परिषदि संपत्तिसरितः प्रशस्तिं श्लाघनं न विन्दन्तीत्यन्वयः । सम्पत्तिसरितः कीदृश्यः; अमित्रेत्यादि— अमित्रोपक्षेपणे शत्रुनिरसनोद्योगक्षण एव विगलन्त्या आत्मीयपृतनायाः स्वयूध्यसेनाजनस्य दृढो य आमर्दः प्रबलसामन्तात् संक्षोभः तस्मात् त्रस्यन्तः शलभ एवागता इति भ्रमेण बिभ्यतो ये द्रमिडभटाः तेषां पलायमानानां जङ्घानां यादृशो जवस्तादृशजवभृतः, द्रमिडभटा ह्यतिभीरवः पलायने महावेगवन्तः तद्वदतिशीघ्रगामिन्यः, सम्पदोऽतिचञ्चला इत्यर्थः । पुनश्च कीदृश्यः, प्रशमसुखमेव दिव्यामृतसरित् तत्र प्रलीनाः । यथा महाप्रवाहवत्यां नद्यां क्षुद्रनद्यो लीना भवन्ति तद्वत्तदीयप्रशमसुखसरिद्भिस्तिरोहिता इत्यर्थः ॥ १२ ॥

इति श्रीमच्छ्रीशैलकुलतिलकस्य वेङ्कटाचार्यसोमसुतः सुतस्य
श्रीश्रीनिवासविदुषः कृतिषु सुभाषितनीवी-
व्याख्यायां रत्नपेटिकाख्यायां
महापुरुषपद्धतिः
षष्ठी ॥

समचित्तपद्धतिः ॥

अथ समचित्तत्वं महाजनस्य धर्म इति समचित्तपद्धतिरारभ्यते—

पुंसः कस्य चिदास्थाने द्विजेन्द्रः सूरिसेविते ।
गुणवत्पक्षपातेऽपि मध्ये तिष्ठति मानभृत् ॥ १ ॥

पुंस इति ॥ सूरिसेविते कस्य चित्पुंसो महाप्रभोरास्थाने, गुणवत्सु पक्षपाते सत्यपि व्यवहारवेलायां, मानभृत् प्रमाणान्यनुसरन्, मध्ये तिष्ठति वादिप्रतिवादिनोर्मध्यस्थो भवति, पक्षपात्यपि मध्यस्थ इति विरोधाभासः । अत्र निदर्शनम्— कस्यचित्पुंसो रङ्गनायकस्य नित्यसूरिसेविते आस्थाने, द्विजेन्द्रो गरुत्मान् गुणवत्पक्षपातेऽपि आवृत्तिमत्पक्षप्रसरणे सत्यपि मानभृत् पूजां बिभ्रत् मध्ये तिष्ठति रङ्गमण्टपमध्ये तिष्ठति । 'गुणस्त्वावृत्तिशब्दादिवेन्द्रियामुख्यतन्तुषु' इति रत्नमाला ॥ १ ॥

महाजनाःसर्वत्र समबुद्धय एव, तेषु केषांचिदादरः केषांचिदनादरश्च तत्तत्पुरुषस्वभावाद्भवतीत्याह—

चकोरानादरं देवश्चक्रवाकस्य चादरम् ।
विवस्वान् नाभिसंधत्ते विश्वमेतत्प्रकाशयन् ॥ २ ॥

चकोरेति ॥ देवः प्रकाशमानः, विवस्वान् सूर्यः, एतद्विश्वं जगत्,

प्रकाशयन्, चकोरानादरं नाभिसन्धत्ते, स्वप्रकाशनेन चन्द्रे निस्तेजस्के सति चकोराणां चन्द्रिका मास्त्विति सूर्यस्याभिसन्धिर्नास्ति, तथा चक्रवाकस्यादरं च नाभिसन्धत्ते, स्वप्रकाशनेन चक्रवाकस्य स्त्रिया संभोगो भवतु इति अभिसन्धिर्नास्ति इत्यर्थः । विश्वप्रकाशनमेव तस्य कार्यं, तत्तददृष्टानुगुण्येन आनुकूल्यानानुकूल्ये इति भावः ॥

क्षुद्राणां देशकालवशेन वैषम्ये सत्यपि महतां कदापि न वैषम्यमित्याह—

देशकालविशेषेण विषमत्वं समत्ववत् ।
निशादिवसयोर्दृष्टमहोरात्रस्य न क्वचित् ॥ ३ ॥

देशकालेति ॥ निशादिवसयोः देशकालविशेषेण समत्ववत् विषमत्वं च दृष्टम् । निशादिवसयोः कदाचित् प्रत्येकं त्रिंशद्घटिकात्मकत्ववत् देशविशेषेण लङ्कोदयादिषु उदयास्तमययोर्वैषम्यं भवति । कालविशेषेण, निशायास्त्रयस्त्रिंशद्घटिकात्मकत्वम्, दिवसस्य सप्तविंशतिघटिकात्मकत्वम्, तथा दिवसस्य त्रयस्त्रिंशद्घटिकात्मकत्वं निशायाः सप्तविंशतिघटिकात्मकत्वमित्यादि भवतीत्यर्थः । अह्नो रात्रेश्च समाहारः अहोरात्रः, 'अहस्सर्वैकदेशसंख्यातपुण्याच्च रात्रेः' इति समासान्तोऽच्प्रत्ययः, 'रात्राह्नाहाः पुंसि' इति पुंल्लिंगत्वम्, 'रूपरात्रिरथन्तरेषु रुत्वं वाच्यम्', इति एकदेशविकृतस्यानन्यत्वाद्रात्रशब्देऽपि रुत्वम् । अहोरात्रिसमुदायस्य क्वचिदपि, कदाचिदपीत्यध्याहार्यम् । वैषम्यं न दृष्टम् । सर्वत्र सर्वदा षष्टिघटिकात्मकत्वमेवेति भावः । अत्राहोरात्रो निदर्शनम् । अप्रस्तुतप्रशंसालङ्कारः ॥ ३ ॥

नित्यसन्तुष्टानां महात्मनां पदार्थसत्त्वे तदभावे चैकरूपचित्ततैव, न विकारित्वमित्याह—

प्रतिगृह्णति जीमूते प्रत्यर्पयति वा स्वयम् ।
अपूरणमपांपत्युः पूरणं च न लक्ष्यते ॥ ४ ॥

प्रतीति ॥ जीमूते मेघे प्रतिगृह्णति समुद्रोदकं पिबति सति, प्रत्यर्पयति वर्षति सति वेत्यर्थः । 'उदेति सविता ताम्रस्ताम्र एवास्तमेति च । उत्पत्तौ च विपत्तौ च महतामेकरूपता ॥' इत्याहुः ॥

'छेदेऽपि चन्दनतरुः सुरभयति मुखं कुठारस्य ।' इति न्यायेन महात्मानः सर्वत्र समस्वभावा इत्याह—

छिद्रं जनयतां नीचैरच्छिद्रं बिभ्रतामपि ।
त्रासहीनाः सुमणयः स्वभावादुपकुर्वते ॥ ५ ॥

छिद्रमिति ॥ नीचैः अधोभागे छिद्रं रन्ध्रं, नीचैः निकृष्टपुरुषैः अन्तःकलहं च, अछिद्रं हीरमण्यादिकमिति भावः । त्रासो नाम मणिदोषः । तदुक्तं बाहलेन 'रागस्त्रासश्च बिन्दुश्च रेखा च जलगर्भता । सर्वरत्नेष्वमी पञ्च दोषाः साधारणा मताः ।' इति । अन्यत्र भयं, तद्रहिताः सुमणयः स्वभावादुपकुर्वते; 'अथवा भवतः प्रवर्तेना न कथं पिष्ठमियं पिनष्टि नः । स्वत एव सतां परार्थता ग्रहणानां हि यथा यथार्थता ।' इति श्रीहर्षः ॥ ५ ॥

समचित्तस्वभावं सर्वेऽपि प्रणमन्तीत्याह—

अनुज्झितसुहृद्भावः सुहृदां दुर्हृदामपि ।
सम इत्येव भाव्योऽपि नम इत्यभिभाष्यते ॥ ६ ॥

अनुज्झितेति ॥ स्पष्टम् । सम इति वक्तव्ये नम इत्युच्यत इति चित्रमिति भावः ॥ ६ ॥

'दुर्जनः सुजनं द्वेष्टि' इति दुष्टैः पीड्यमानोऽपि न विकारं गच्छतीत्याह—

मरुद्भिः पीड्यमानोऽपि संत्यक्तोऽपि दिवानिशम् ।
विषयस्नेहरहितो रत्नदीपः प्रकाशते ॥ ७ ॥

मरुद्भिरिति ॥ विषयस्नेहरहितः पात्रतैलरहितः विषयाभिलाषरहितश्च ; विषयाभिलाषिणः खलु तदभावे मनोविकारः । रत्नदीपः प्रकाशते । प्राप्ते विबुधो यथा प्रकृत्यास्ते 'न विकारं व्रजति महांश्चातुर्मास्येष्विवाज्यपशुशब्दः॥' इति नयमालिकायां मामकः श्लोकः ॥

जनयत्यनले दाहं शमयत्यपि तोयदे ।
अभिन्नैः स्थीयते पुण्यैराश्रमारण्यपादपैः ॥ ८ ॥

जनयतीति ॥ अभिन्नैः एकरूपैः; स्थीयते स्थितम्, भावे लट् ॥

'लाभः श्रीमत्तरं किंचिदन्यत्पथ्यतरं मतम् । प्रभविष्णोर्यथा तातं क्षमा सर्वत्र सर्वदा ॥ क्षमेदशक्तः सर्वस्य शक्तिमान् धर्मकारणात्' इति महात्मानः क्षमयैव सर्वं जयन्तीत्याह—

अहार्येण कदाप्यन्यैरसंहार्येण केनचित् ।
तितिक्षाकवचेनैव सर्वं जयति संवृतः ॥ ९ ॥

अहार्येणेति ॥ तितिक्षाकवचेन संवृतः आच्छादितः जयति सर्वमतिशेत इत्यर्थः । 'हन्ति नित्यं क्षमा क्रोधमाचारो हन्त्यलक्षणम्' इति क्रोधनिवृत्तौ न कश्चिदपि वैरीति सर्वं स्वाधीना एवेति जय इति भावः । लौहकवचापेक्षया तितिक्षाकवचस्य व्यतिरेकः तत्सहकृतश्च परिणामालङ्कारः, स्वरूपेण सर्वजयासाधनत्वादारोप्यमाणस्य कवचस्य तितिक्षात्मना उपयोगात्, 'परिणामः क्रियार्थश्चेद्विषयी विषयात्मना' इति तल्लक्षणात् ॥ ९ ॥

भगवदेकान्ती भगवद्व्यतिरेकेण किमपि नापेक्षते, अतः स एव समचित्त इत्याह—

अमृतस्यन्दिनं कश्चित्कृष्णमेघं द्विजः स्मरन् ।
उदन्यया न वेशन्तमुदन्वन्तं च वीक्षते ॥ १० ॥

अमृतेति ॥ कश्चित् द्विजः चातकः, अमृतस्यन्दिनं उदकवर्षिणं नीलमेघं स्मरन्, उदन्यया पिपासया, 'उदन्या तु पिपासा तृट् तर्षः' इत्यमरः । वेशन्तं अल्पसरः, उदन्वन्तं समुद्रं च न वीक्षते । मोक्षप्रदं कृष्णं लक्ष्यीकृत्य पुरुषार्थेप्सया ब्रह्मरुद्रादीन् लौकिकक्षुद्रानपि कश्चिन्नाद्रियवान् न वीक्षत इत्यर्थः ॥ १० ॥

समचित्तस्य दुर्जनसृष्टिरप्युपकारायैवेति मतिरित्यभिप्रेत्याह—

विदधातु धाम तमसा कृतेन किं
यदि वा न वेत्ति न विधिर्न वा वयम् ।
प्रथमोपकारि चरमं यतस्ततः
प्रतियोगीनो भवति तस्य सार्थता ॥ ११ ॥

विदधात्विति ॥ विधिः, धाम तेजः, विदधातु सृजतु, आलोकस्य चाक्षुषप्रत्यक्षादिहेतुत्वेन लोकोपकारत्वादिति भावः । कृतेन तमसा किं तमःसृष्ट्या किं प्रयोजनम्, लोकप्रतिबन्धकत्वादिति भावः । एवं चोद्ये उत्तरमाह—यदिवेति । पक्षान्तरे विधिर्न वेत्तीति न तत्प्रयोजनं न जानातीति न, जानात्येव, न वा वयं, वयं वा न विद्म इति नेत्यनुषङ्गः, यतः कारणात् चरमं तमः प्रथमोपकारि आलोकस्योपकारकं, तमःसृष्टयभावे आलोकापेक्षाविरहात्, ततः कारणात् तस्यालोकस्य प्रतियोगिनः तमसः सार्थता भवति, तमसोऽभावे आलोकप्रयोजनं न ज्ञायेत, अतः तमः सृष्टवानिति भावः । 'हस्त इव भूतिमलिनो यथा यथा लङ्घयति खलः सुजनम् । दर्पणमिव तं कुरुते तथा तथा निर्मलच्छायम् ।' 'साधुपापविशुद्धयर्थं दुर्जनः परिकल्पितः । ग्रामवीधीविशुद्धयर्थं सूकरः परिकल्पितः' इत्यादि द्रष्टव्यम् ॥११॥

सर्वसमः पुरुषः सर्वेषां हृदयंगम इत्याह—

विषयेष्वपि दोषगन्धहीनः
प्रलयेऽपि स्थितिमक्षयां दधानः ।

विषमेष्वपि भावयन्समत्वं
पुरुषः कोऽपि हृदि स्थितः प्रजानाम् ॥ १२ ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य
कृतिषु सुभाषितनीव्यां
समचित्तपद्धतिः
सप्तमी ॥

विषयेष्विति ॥ विषयाभिलाषरहिततया तत्प्रयुक्तरागद्वेषादिदोषलेशहीनः, नानाविधस्थानस्थितत्वेऽपि हेयप्रतिभटतया तत्प्रयुक्तापुरुषार्थादिरहितश्च, प्रलयेऽपि सङ्कटदशायामपि धैर्येणाक्षयां स्थितिं दधानः, 'एको ह वै नारायण आसीत्' इत्युक्तरीत्या प्रलयेऽपि स्थितिं दधानश्च, विषमेषु विरुद्धेष्वपि समत्वं भावयन् उपेक्षाबुद्धिं कुर्वन् 'समोऽहं सर्वभूतेषु' इति समदृष्टिं कुर्वंश्च; यद्वा विषमेषु सत्त्वरजस्तमस्स्वपि समत्वं प्रलयावस्थां भावयन् पुरुषः प्रजानां हृदि स्थितः समीचीन इति मनस्यनुसंहितः, अन्तर्यामिरूपेण स्थितश्च । अत्र परमपुरुषसाम्यम् ॥ १२ ॥

इति श्रीमच्छ्रीशैलकुलतिलकस्य वेङ्कटाचार्यसोमसुतः सुतस्य
श्रीश्रीनिवासविदुषः कृतिषु सुभाषितनीवी-
व्याख्यायां रत्नपेटिकाख्यायां
समचित्तपद्धतिः
सप्तमी ॥

सदाश्रितपद्धतिः ।

सुवृत्तस्यावदातस्य कलापूर्णस्य सत्पतेः ।
क्षणलेशग्रहेऽपि स्यादतीर्थस्यापि तीर्थता ॥ १ ॥

सुवृत्तस्येति ॥ सुवृत्तस्य सदाचारस्य, अवदातस्य रागादिदोष-हीनस्य, सत्पतेः सत्पुरुषश्रेष्ठस्य, चन्द्रस्य च; क्षणलेशेऽल्पकाले ग्रहेऽपि स्वीकारेऽपि उपरागेऽपि च, अतीर्थस्य अयोग्यस्यापि तीर्थता योग्यता भवति । महदाश्रयणादयोग्योऽपि योग्यो भवती-त्यर्थः । सर्वं गङ्गासमं तोयमिति जलमात्रस्य पुण्यतीर्थत्वंभवतीति च; 'निपानागमयोस्तीर्थमृषिजुष्टजले गुरौ' इत्यमरः । 'पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः । तेनैव ते प्रयास्यन्ति तद्विष्णोः परमं पदम्' इत्यादिकमनुसंधेयम् ॥ १ ॥

सदाचार्यं समाश्रितस्य ज्ञानप्राप्त्या न रागादिदोषसंभव इत्याह—

प्रतिपत्प्राप्तितः प्रागप्यापदा सत्पदाश्रितः ।
राजा तदितरो वापि नोपरागेण गृह्यते ॥ २ ॥

प्रतिपदिति ॥ प्राक् ज्ञानलाभात् प्राक्, आपदा तापत्रयदुःखेनो-पलक्षितोऽपि इति शेषः । सत्पदाश्रितः प्रतिपत्प्राप्तितः ज्ञानप्राप्तितः प्रतिपत् शक्तिश्चेतनाः' इत्यमरः; राजा तदितरो वापि, उपहतो राग

उपरागः प्रादिसमासः, तेन न गृह्यते न पीड्यते। अत्र चन्द्रः सूर्यश्च निदर्शनम्। तत्र पक्षे प्राक् प्रतिपत्प्राप्तितः प्राक्, आपदा पर्वणि राहुकेतुग्रहपीडया उपलक्षितोऽपि तदनन्तरं राजा चन्द्रः तदितरः सूर्यः उपरागेण राहुग्रसनेन न गृह्यते। 'उपरागो ग्रहे राहुग्रस्ते त्विन्दौ च पूष्णि च' इत्यमरः ॥ २ ॥

महाजनयोगात्पुरुषः प्रसिद्धो भवतीत्याह—

विषमो गुणभेदेन विकारान् जनयन् क्रमात्।
समये महता योगादहंकारः प्रतीयते ॥ ३ ॥

विषम इति ॥ गुणभेदेन सत्त्वरजस्तमोगुणभेदेन विषमः भिन्नभिन्नप्रकृतियुक्तः, गुणसाम्यावस्था प्रधानस्य प्रलयः, वैषम्यावस्था सृष्टिरिति गुणवैषम्ययुक्तश्च, क्रमात्, महदादिविकारांश्च जनयन कुर्वन् प्रधानाख्यपदार्थ इत्यर्थः। समये भाग्यपरिपाकसमये सृष्टिकाले च, अहंकारः प्रत्यगात्मा, अथातोऽहंकारावेश इत्यादिषु जीवेऽहंकारशब्दप्रयोगात्; अहमिति कारयति उच्चारयतीत्यहंकारः। पदं मिथ्याकारयत इत्यादौ कृञ इत्युच्चारणार्थत्वदर्शनात् अहंकार इति तत्वविशेषश्च सन्, महता महापुरुषेण महत्तत्वेन च योगात्, प्रतीयते प्रसिद्धो भवति अहंकारतत्त्वात्मना ज्ञायते चेत्यर्थः। अत्र प्रधानं निदर्शनम् ॥ ३ ॥

सत्पुरुषाभिमुख्यात् स्वरूपज्ञानवान् भवतीत्याह—

स्वदृष्टिप्रतिघातेऽपि स्वच्छे कचन शोभनः।
तत्र ह्यभिमुखः स्वात्मा झडित्येव प्रकाशते ॥ ४ ॥

स्वदृष्टीति ॥ स्वदृष्टिप्रतिघातेऽपि स्वस्याज्ञाने सत्यपि स्वचक्षूरश्मीनां प्रसरणप्रतिबन्धेऽपि च, स्वच्छे यत्र क्वचन परिशुद्धज्ञानादिमति दर्पणे च, शोभनः प्रकाशमानः, तत्र गुरौ दर्पणे च अभिमुखः, स्वात्मा, झडित्येव शीघ्रमेव, प्रकाशते। नायनरश्मय एव दर्पणे प्रतिहतगतयः परावृत्य स्वमुखं गृह्णन्तीत्याहुः। 'आभिमुख्यदशामात्रादादर्श इव सज्जनः । शीघ्रं रक्तमरक्तं वा गृह्णाति स्वप्रसादतः ॥' इति नीतिवेदिनः ॥ ४ ॥

*** शिक्षके हरिताकारो मेरौ नीलतनुर्द्विजः ।**
अपूर्ववर्णवद्भाति सत्यनिष्ठे च कौशिकः ॥ ५ ॥

महदुपदेशप्राप्तं ज्ञानं अज्ञाननिवृत्तिं समृद्धिं च तनोतीत्याह—

कलङ्किनि जले क्वापि सौरं प्रतिफलन्महः ।
तमोऽपहृत्वं तनुते समृद्धिं च दिने दिने ॥ ६ ॥

कलङ्किनीति ॥ कलङ्किनि अङ्कवति अपवादवत्यपि, जले उदके, चन्द्रस्य जलविकारत्वात् जडे च, प्रतिफलत् प्रविशत्, सौरं सूर्यसम्बन्धि सूरिसंबन्धि च, महः तेजः ज्ञानं च, तमोऽपहृत्वं अज्ञाननिवृत्तिं च दिने दिने, समृद्धिं कलावृद्धिं ज्ञानवृद्धिं च, तनुते । अत्र सूर्यतेजो गुरूपदिष्टज्ञानस्य निदर्शनम् । 'ज्ञानाङ्कुरं तत् परिवर्धयन्ति ये शास्त्रसत्सङ्गतितोयसेकैः । ते तु प्रबुद्धात् फलमाप्नुवन्ति मोक्षाभिधं ज्ञानतरोर्दुरापम् ।' इत्याद्यनुसन्धेयम् ॥ ६ ॥

* अस्य श्लोकस्य रत्नपेटिकाव्याख्या नोपलभ्यते ।

स्वतो बुद्धिरहितस्यान्तश्छिद्रवतः पुरुषार्थव्यापाराः हितकारिपरोपदेशेनैवेत्याह—

स्वतश्चैतन्यहीनस्य विषमच्छिद्रभागिनः ।
कस्यचित्प्राज्ञमूलाः स्युः पुरुषार्थप्रवृत्तयः ॥ ७ ॥

स्वत इति ॥ चैतन्यहीनस्य अचेतनस्य, विषमस्य गुणवैषम्यवतः, छिद्रभागिनः, 'सच्छिद्राण्यवयविद्रव्याणि' इति प्रसिद्धेः । कस्यचित् प्रधानस्य पुरुषार्थप्रवृत्तयः जीवार्थदेहेन्द्रियपरिणामादिव्यापाराः, प्राज्ञमूलाः परमात्ममूलाः । स्पष्टमन्यत् । अत्र प्रधानं निदर्शनम् ॥ ७ ॥

महदाश्रयो महानेव भवतीत्याह—

महान्तं पुरुषं प्राप्य कंचित्सत्त्वप्रवर्तकम् ।
प्रतिबुद्धो जनस्तेन परमं साम्यमश्नुते ॥ ८ ॥

महान्तमिति ॥ प्रतिबुद्धो जनः विवेकी मोक्षकामश्च, 'महान् प्रभुर्वै पुरुषः सत्त्वस्यैव प्रवर्तकः' 'निरञ्जनः परमं साम्यमुपैति' इति श्रुती अनुसन्धेये । मुक्तपुरुषोऽत्र निदर्शनम् ॥ ८ ॥

प्रकारान्तरेणापि महाजनाश्रयेण तदन्तर्गतत्वमभिप्रेत्याह—

सूत्रं रत्नसमावेशाच्चर्म सत्पदसंश्रयात् ।
तदभेदेन गृह्येत तृणमप्यल्पमव्रणात् ॥ ९ ॥

सूत्रमिति ॥ किमुत पुरुष इति काव्यार्थापत्तिर्व्यज्यते, तथा वर्तितव्यमिति भावः ॥ ९ ॥

आचार्यकटाक्षलभ्यार्थो रुद्रेण चतुर्मुखेनेन्द्रेण च न लभ्यत इत्याह—

एकयैव गुरोर्दृष्ट्या द्वाभ्यां वापि लभेत यत् ।
न तत्त्रिसृभिरष्टाभिः सहस्रेणापि कर्हिचित् ॥ १० ॥

एकयेति ॥ कर्हिचित् कुत्रचिदपि ॥ १० ॥

परस्परसङ्गत्या परिशुद्धानाह—

नद्यास्तोयं त्रिदशसरिता राजनीतिः सुकीर्त्या
काव्यालापस्त्रियुगकथया कायवानात्मबुद्ध्या ।
दारप्रीतिः प्रजननधिया जन्तुहिंसा मखेन
प्रज्ञाहीनः परहितविदा संगतः शुद्धिमेति ॥११॥

नद्या इति ॥ अल्पनद्यास्तोयं गङ्गया सङ्गतं सत् शुद्धिमेतीत्यन्वयः । राजनीतिः सुकीर्त्या सङ्गता चेत् । त्रियुगकथया त्रियुगस्य भगवतः कथया, त्रीणि युगानि ज्ञानबलादियुग्मानि यस्य स तथोक्तः, अन्यथा 'काव्यालापांश्च वर्जयेत्' इति निषेधात् । अत एवोक्तं भगवता बादरायणेन 'असत्कीर्तनकान्तारपरिवर्तनपांसुलाम् । वाच शौरिकथालापगङ्गयैव पुनीमहे ॥' इति । कायवान् शरीरी, आत्मबुद्ध्या देहादिविलक्षणात्मज्ञानेन परमात्मज्ञानेन च, 'क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मता' इत्युक्तम् । दारेषु प्रीतिः, प्रजननधिया वंशप्रतिष्ठा भवतीति बुद्ध्या सङ्गता चेत् शुद्धिमेतीत्यन्वयः । 'धर्मप्रजासंपत्स्यर्थं स्त्रियमुद्वहे' 'प्रजायै गृहमेधिनाम्' इति धर्मोपयोगात् ।

'यत्नानुकूल्यं दंपत्योस्त्रिवर्गस्तत्र वर्धते' इति स्मृतम् । जन्तुहिंसा मखेन, अन्यथा जन्तुहिंसाया निषिद्धत्वात् । प्रज्ञाहीनः स्वत उपायोन्नयनानभिज्ञः, परहितविदा आप्तेन सङ्गतः शुद्धिमेति, अनर्थान्निस्तरति । **दीपकालङ्कारः** ॥ ११ ॥

महदाश्रयणे महात्मानः परार्थैकप्रवणाः परार्थमकृत्यमपि कृत्वा परार्थं साधयन्तीत्यभिप्रेत्याह—

विभुर्बन्धं प्राप्य व्यतनुत विमुक्तिं व्रजभुवां
स्वतन्त्रोऽसौ धूर्तः स्वयमजनि सूतश्च भजताम् ।
प्रतिज्ञां स्वामौज्झत्स्वपदतटिनीसूनुसमरे
महद्योगात्प्रायो वहति महिमानं तदधिकम् ॥१२॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य
कृतिषु सुभाषितनीव्यां
सदाश्रितपद्धतिः
अष्टमी ॥

विभुरिति ॥ पुरुषः महद्योगात् तदाश्रयणात् तदधिकं महिमानं वहति, प्रायः निश्चय इत्यन्वयः । अत्र निदर्शयति—उलूखले स्वयं बन्धं प्राप्य यमलार्जुनवृक्षादीनां व्रजभुवां विमुक्तिं व्यतनुत । 'बद्धं तथा भावयतां मुकुन्दमयत्नविच्छेदिनि कर्मबन्धे । तपस्विनां तत्क्रतुनीतिराद्या सव्रीडमारण्यकथासु तस्थौ' इति न केवलमर्जुन-

वृक्षयोरेव, अपि तु सर्वेषामपीति भावः । प्रतिज्ञामिति । 'भक्त्या त्वनन्यया शक्यः' इति स्वप्रतिज्ञाम् । 'विष्णुवामपदाङ्गुष्ठनखस्रोतोविनिःसृते । तद्भक्तिविघ्नरूपा त्वं गङ्गे मां मोचयैनसः' इत्युक्तरीत्या गङ्गास्नानादिनापि मुक्तिं सम्पाद्य त्यक्तवानिति भावः । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ १२ ॥

इति श्रीमच्छ्रीशैलकुलतिलकस्य वेङ्कटाचार्यसोमसुतः सुतस्य
श्रीश्रीनिवासविदुषः कृतिषु सुभाषितनीवी-
व्याख्यायां रत्नपेटिकाख्यायां
सदाश्रितपद्धतिः
अष्टमी ॥



नीतिमत्पद्धतिः ॥

विक्रमाक्रान्तभुवने समे षाड्गुण्यशालिनि ।
भजति स्थिरतां लक्ष्मीः कस्मिंश्चित्पुरुषोत्तमे ॥ १ ॥

विक्रमेति ॥ विक्रमेण पराक्रमेण पादन्यासेन च, आक्रान्तभुवने आक्रान्तलोके, समे सर्वजनसमानवृत्तौ, षाड्गुण्यशालिनि सन्धिविग्रहयानासनद्वैधीभावसमाश्रयाख्यषड्गुणशालिनि, षड्गुणा एव षाड्गुण्यं, स्वार्थे ष्यञ्, ज्ञानबलैश्वर्यवीर्यशक्तितेजःशालिनि च, कस्मिंश्चित् पुरुषोत्तमे पुरुषधौरेये परमपुरुषे च, लक्ष्मीः सम्पत् देवी च, 'शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरिति कथ्यते' इति निघण्टुः । स्थिरतां भजति । पुरुषोत्तमशब्दसमर्थनं बहुधा ग्रन्थेषु कृतमिति नेह तन्यते । 'जानाति विश्वासयितुं मनुष्यान् विज्ञातदोषेषु ददाति दण्डम् । जानाति मात्रां च तथा क्षमां च तं तादृशं श्रीर्जुषते समग्रा ।' मात्रां विषयाणामनित्यत्वम् 'एकया द्वौ विनिश्चित्य त्रींश्चतुर्भिर्वशे कुरु । पञ्च जित्वा विदित्वा षट् सप्त जित्वा सुखीभव ॥' बुद्ध्या धर्मार्थौ साद्ध्यौ विनिश्चित्य शत्रुमित्रोदासीनान् सामादि चतुर्भिरुपायैः स्वाधीनान् कुरु, ज्ञानेन्द्रियादिपञ्च जित्वा षट् सन्ध्यादीन् स्वाधीननियोज्यान् कृत्वा पानादिसप्तव्यसनानि परिहृत्य सुखी भवेत्यर्थः ॥ १ ॥

'समवेक्ष्येह धर्मार्थौ सम्भारान् योऽधिगच्छति । स वै संभृतसंभारः सततं सुखमेधते ॥ यः पञ्चाभ्यन्तरान् शत्रूनविजित्य मनोमयान् । जिगीषति रिपूनन्यान् रिपवोऽभिभवन्ति तम् ॥ अनसूयार्जवं शौचं सन्तोषः प्रियवादिता । दमः सत्यमनायासो न भवन्ति दुरात्मनाम् ॥ धूमायन्ते व्यपेतानि ज्वलन्ति सहितानि च । धृतराष्ट्रोल्मुकानीव ज्ञातयो भरतर्षभ ॥ महानप्येकजो वृक्षो बलवान् सुप्रतिष्ठितः । प्रसह्य एव वातेन सस्कन्धो मर्दितुं क्षणात् ॥ अथ ये सहिता वृक्षाः सङ्घशः सुप्रतिष्ठिताः । ते हि शीघ्रतमान् वातान् सहन्तेऽन्योन्यसंश्रयात् ॥ ज्ञातिभिर्विग्रहस्तात न कर्तव्यः शुभार्थिना । सुखानि सह भोज्यानि ज्ञातिभिर्भरतर्षभ ॥ ज्ञातयो वर्धनीयास्तैर्य इच्छन्त्यात्मनः शुभम् । कुलवृद्धिं च राजेन्द्र तस्मात् साधु समाचर' इत्युक्तरीत्या ज्ञात्यनादरणनिमित्तमन्तश्छिद्रं कुलं नाशयति, तस्मात् नीत्या वर्तितव्यमित्यभिप्रेत्याह—

पार्थिवानां पदार्थानां स्वभूत्या चक्रवर्तिनाम् ।
जनयत्यचिराद्भेदं छिद्रेण महतान्वयः ॥ २ ॥

पार्थिवानामिति ॥ पदाय राज्याय इमे पदार्थास्तेषां स्वभूत्या स्वैश्वर्येण चक्रवर्तिनां अखण्डभूमण्डलाधिपतीनां पार्थिवानां राज्ञां अन्वयो वंशः महता छिद्रेण अन्तःकलहेन भेदं जनयति, प्रभुत्वं नानामुखं करोति । अत्र घटादिनिदर्शनं स्वभूत्या स्वीयया स्वोत्पादनार्थमपेक्षितया भूत्या भस्मना सह चक्रवर्तिनां कुलालचक्रस्थितानां पार्थिवानां पदार्थानां घटादीनामन्वयः सद्भावः, महता छिद्रेण भेदं भग्नत्वं जनयति ॥ २ ॥

सम्यक्परिपालने स एव लोकपालो भवतीत्याह—

सदसन्तौ विचिन्वानः समवर्ती शमप्रदः ।
अपि दण्डधरो नित्यं लोकपालः सदक्षिणः ॥ ३ ॥

सदिति ॥ सदसन्तौ गुणदोषसत्त्वासत्त्वे विचिन्वानः विमृशन्, समवर्ति सर्वसमानवृत्ति, शमप्रदः यथाधिकारं क्षमावान् । दण्डधरोऽपि दक्षिणःसमर्थो, लोकपालः लोकरक्षकः । अत्र निदर्शनं यमः स हि धर्माधर्मविचारयिता, समवर्ती शमनः कालदण्डाख्यदण्डधरः, दक्षिणो लोकपालः दक्षिणदिक्पालः । 'अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् । अयशो महदाप्नोति नरकं चाधिगच्छति' इत्यादिस्मृतिरनुसन्धेया ॥ ३ ॥

महावीरो वानरचेष्टाभिर्युद्धं कुर्वन्नपि अवसरे भातीत्याह—

तमिस्राचारिणां योद्धा विजिताक्षो मरुत्प्रियः ।
कपिकृत्यैरपि स्थाने भाति वेलातिलङ्घिभिः ॥ ४ ॥

तमिस्रेति ॥ तमिस्राचारिणां रोद्धा तामसाचारवतां नियन्ता, रात्रिञ्चराणां हिंसकश्च, विजिताक्षः जितेन्द्रियः जिताक्षकुमारश्च, मरुतां देवानां प्रियः वायुप्रियश्च, वेलातिलङ्घिभिः मर्यादातीतैः अब्धिवृद्धिमतिक्रम्य कृतैश्च, 'वेलाब्धितीराभिवृद्ध्योः' इति रत्नमाला। कपिकृत्यैरपि स्थाने युक्तसमये भाति । हनुमानत्र निदर्शनम् । अतो यथाकथंचित्पराक्रमं कुर्यादिति भावः । 'निजानन्तरतः शत्रून् पञ्च पञ्चप्रयोजनान् । यो मोहान्न निगृह्णाति तमापद्ग्रसते नरम् ।

'वश्येन्द्रियं जितात्मानं धृतदण्डं विकारिषु । परीक्ष्यकारिणं वीरमत्यन्तं श्रीर्निषेवते ।' 'दानं होमं दैवतं मङ्गलानि प्रायश्चित्तं विविधान् लोकवादान् । एतानि यः कुरुते नैत्यिकानि तस्योत्थानं देवता राधयन्ति' इत्यादीनि द्रष्टव्यानि ..... ॥ ४ ॥

'प्रसादो निष्फलो यस्य क्रोधो यस्य निरर्थकः । न तं भर्तारमिच्छन्ति षण्डं पतिमिव स्त्रियः ।' 'अपनीतं सुनीतेन योऽर्थं प्रत्यानिनीषते । मतिमास्थाय सुदृढां तदकापुरुषव्रतम् ॥ आयत्यां प्रतिकारज्ञः तथाद्य दृढनिश्चयः । अतीतकार्यशेषज्ञो नरोऽर्थैर्न प्रहीयते' इति राजनीतिमनुवर्तमानो न शत्रुभिर्जीयत इत्याह—

अङ्गयुक्तः कृतास्त्रश्च कुर्वन्सम्यक्पुरोविधिम् ।
विजानन्सिद्धसाध्यादीन्वैरिणोऽस्त्रैर्न पीड्यते ॥ ५ ॥

अङ्गेति ॥ 'स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च । राज्याङ्गानि' इत्युक्ताङ्गयुक्तः, कृतास्त्रः शिक्षितधनुर्विद्यः, सम्यक्पुरोविधिं कुर्वन् पुरोहितवरणं कृत्वा सर्वकार्येष्वग्रतो ब्राह्मणं कुर्वन्नित्यर्थः । सिद्धसाद्ध्यादीन् एतावत्कार्यं सिद्धं, एतावत्कार्यं साध्यं इति जानन् कृतप्रत्यवेक्षणेन कृत्यशेषं निर्धारयन्नित्यर्थः । एवंविधो राजा वैरिणोऽस्त्रैर्न पीड्यते । अत्र मन्त्रशास्त्रप्रक्रियया पुरश्चरणं कुर्वाणो निदर्शनम् । अङ्गयुक्तः षडङ्गद्वादशाङ्गादिन्यासयुक्तः, कृतास्त्रः कृतास्त्रमन्त्रः, सिद्धसाध्यादीन् मन्त्रार्पणविधिना स्वनाम्ना सिद्धसाध्यादिस्थानानि विजानन्, पुरोविधिं कुर्वन् पुरश्चरणं कुर्वन्, वैरिणोऽस्त्रैर्न पीड्यत इति ॥ ५ ॥

'निश्चित्य यः प्रक्रमते नान्तर्वसति कर्मणः । अवन्ध्यकालो वश्यात्मा स वै पण्डित उच्यते ॥ यस्य कृत्यं न जानन्ति मन्त्रं वा मन्त्रितं परे । कृतमेवास्य जानन्ति स वै पण्डित उच्यते ॥ यथाशक्ति चिकीर्षन्ति यथाशक्ति च कुर्वते । न किंचिदवमन्यन्ते नराः पण्डितबुद्धयः ॥ आर्यकर्मणि रज्यन्ते भूतिकर्माणि कुर्वते । हितं च नाभ्यसूयन्ति पण्डिता भरतर्षभ ॥ मङ्गलालम्बनं योगः श्रुतमुत्थानमार्जवम् । भूतिमेतानि कुर्वन्ति सतां चाभीक्ष्णदर्शनम् ॥' 'बलं पञ्चविधं नित्यं पुरुषाणां निबोध मे । यत्तु बाहुबलं नाम प्रथमं बलमुच्यते ॥ अमात्यलाभो भद्रं ते द्वितीयं बलमुच्यते । तृतीयं धनलाभं च बलमाहुर्मनीषिणः ॥ यत्त्वस्य सहजं राजन् पितृपैतामहं बलम् । अभिजातबलं नाम चतुर्थं बलमुच्यते ॥ यद्बलानां बलं श्रेष्ठं तत्प्रज्ञाबलमुच्यते ।' इत्युक्तपञ्चविधबलशालिनः राज्ञः प्रभुमन्त्रोत्साहशक्तयः सिद्धिहेतव इत्याह—

कामाधिकरणग्राह्यकुलादिबलशालिनः ।
अहीनेऽपि नरेन्द्रस्य शक्तयः सिद्धिहेतवः ॥ ६ ॥

कामेति ॥ काममत्यर्थं अधिकेषु रणेषु ग्राह्यं कुलादिबलं पितृपैतामहादिबलम् । शलति गच्छतीति तथोक्तस्य नरेन्द्रस्य, शक्तयः प्रभुमन्त्रोत्साहशक्तयः, अहीने बलवच्छत्रावपि सिद्धिहेतवः जयहेतवः । विषवैद्योऽत्र निदर्शनम् । कामाधिकरणं कामबीजं सकलमन्त्राणां मन्मथबीजसरस्वतीबीजश्रीबीजादियुक्तत्वात्, तेन ग्राह्यं कुलादिबलं, मन्त्रेषु कुलाकुलमन्त्राः सन्तीति मन्त्रवेदिनो वदन्ति,

तद्बलशालिनः नरेन्द्रस्य सर्पवैद्यस्य, शक्तयः मन्त्रौषधशक्तयः, अहीने सर्पश्रेष्ठेऽपि, सिद्धिहेतवः ग्रहणहेतवः । 'क्षत्रियं चाप्ययोद्वारं विप्रं चाप्यप्रवासिनम् । भूमिरेतौ निगिरति सर्पो बिलशयाविव । संपदा सुस्थिरंमन्यो भवति स्वल्पयापि यः । कुतकृत्यो विधिर्मन्ये न वर्धयति तस्य ताम् ।' इति ॥ ६ ॥

उत्साहशक्तियुक्तः सन् धैर्येण वीर्ययुक्तः कृत्स्नं जगत् निर्वीरं कुर्यादित्याह—

प्रद्युम्नो ह्यनिरुद्धात्मा स्वनाम्ना मानसोदयः ।
वीरः कश्चिद्वितन्वीत स्त्रीप्रायमखिलं जगत् ॥ ७ ॥

प्रद्युम्नेति ॥ कश्चिद्वीरः, प्रद्युम्नः प्रकृष्टधनयुक्तः सन्, 'हिरण्यं द्रविणं द्युम्नम्' इत्यमरः । मानेन अभिमानेन सोदयः अभ्युदययुक्तः सन्, स्वनाम्ना स्वनामप्रसिद्ध्यान्वितः, अनिरुद्धात्मा अप्रतिहतधैर्यः सन्, 'आत्मा यत्नो धृतिर्बुद्धिः' इत्यमरः । अखिलं जगत् स्त्रीप्रायं स्त्रीसदृशं पौरुषहीनं वितन्वीत । एवंविधः श्रेष्ठ इति भावः । 'प्रायश्चानशने मृत्यौ तुल्यबाहुल्ययोरपि' इति विश्वः । अत्र मन्मथो भगवांश्च निदर्शनम् । प्रद्युम्नः कृष्णपुत्रो मन्मथः, तस्य पुत्रोऽनिरुद्धः, तस्मिन्नात्मा मनो यस्य स तथोक्तः । यद्वा अनिरुद्धरूपश्च, 'आत्मा वै पुत्रनामासि' इति श्रुतेः । स्वनाम्ना मानसोदयः, मनोभवः, वीरः कश्चित् अखिलं जगत् स्त्रीप्रायं स्त्र्यनुरागप्रचुरं वितनुते । 'वहति महिलामाद्यो वेधास्त्रयीमुखरैर्मुखैर्वरतनुतया वामो भागः शिवस्य विवर्तते । तदपि परमं तत्त्वं गोपीजनस्य वशंवदं मदनकदनैर्न

क्रोश्येरन् कथं त्वितरे जनाः ॥' 'वर्गे तृतीयमवधरियतां विनेत' इति युक्तम् । भगवत्पक्षे विः पक्षी गरुत्मान्, तेन ईरयति गच्छतीति वीरः, प्रद्युम्नः अनिरुद्धात्मा च वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धा इति व्यूहेषु परिगणितत्वात् स्वनाम्ना स्वनामस्मृत्यर्थं अध्ययनेन वसतीतिवत्, मानसोदयः भक्तानां चित्तेषु अभिव्यक्तः, अखिलं जगत् 'स्त्री-प्रायं पतिं विश्वस्य' इत्युक्तरीत्या स्त्रीतुल्यं वितनुते भर्तृभार्यासंबन्धतुल्यसम्बन्धवत्करोतीत्यर्थः । न च पतित्वमीश्वरत्वमिति वाच्यम् । आत्मैश्वरमिति पुनरुक्तेः ॥ ७ ॥

* यमेनोपक्रमे जानन्विश्वाधीशं व्यवस्थितम् ।
सामादिषु च तत्त्वज्ञः स न कः सिद्धिमर्हति ॥ ८ ॥

* प्रयुक्तं मन्त्रिभिः काले भक्तिभेदपुरस्कृतम् ।
अपि ज्वलनवक्तॄणां साम संवननं परम् ॥ ९ ॥

* विधौ लब्धधृतिर्नीत्या विनतानन्दनो द्विजः ।
नियम्यमानैः स्थानेषु भुजगैरपि भूष्यते ॥ १० ॥

* नीतिः सती त्वयि परं परपुष्टधातुः
पुत्रीकृतोऽपि बलिपुष्टकुलैर्यतस्त्वम् ।
दूरीकृतोऽपि पुरुषैस्तत एव काले
कण्ठो यदेष तव पञ्चममुच्चकार ॥ ११ ॥

---

* एतेषां चतुर्णां श्लोकानां रत्नपेटिकाव्याख्या नोपलभ्यते ॥

क्षमावन्तो महात्मानः क्षान्त्यैवाक्षैपरूक्षाक्षरमुखरमुग्वान् दुर्जनान् दुःखयन्तः कलावन्तः क्षमागुणवत्तया मनःकालुष्यं न प्राप्स्यन्ति । क्षुद्रपुरुषोत्तरादानेन असमर्था इत्यपवादोऽपि तेषां न कर्तुं शक्यत इत्याह—

विबुधमहिते मेरावैरावणः करटी मुहुः
कषतु करटं कण्डूलं स्वं क्षरन्मदकर्दमम् ।
भजतु च तटक्रीडां पादैर्विसन्धि रसादृढं
न च मलिनता नापि क्षोभः कलाभृति संभृतः ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य
कृतिषु सुभाषितनीव्यां
नीतिमत्पद्धतिः
नवमी ॥

विबुधेति ॥ विबुधमहिते देववहुमते विद्वत्पूजिते च, मेरौ, विदुषीति गम्यते, ऐरावणः करटी, ऐरावतो गजः दुर्जनश्च, क्षरन्मदकर्दमं स्रवत्कर्दमसदृशमदं, कण्डूलं कण्डूतियुक्तम्, कटं कषतु, किं च पादैः दृढं विसन्धि विशरसन्धिबन्धं यथा भवति तथा; तटक्रीडां भजतु, कलाभृति सुवर्णधारिणि मेरौ विद्यावति च,

मलिनता मदपङ्कालेपप्रयुक्तमालिन्यम्, न च, अतिस्निग्धत्वादिति भावः। सम्भृतेत्यनुषङ्गः। क्षोभः चलनमपि न सम्भृतः, त्रिलोकाधारत्वादिति भावः ॥ १२ ॥

इति श्रीमच्छ्रीशैलकुलतिलकस्य वेङ्कटाचार्यसोमसुतः सुतस्य
श्रीश्रीनिवासविदुषः कृतिषु सुभाषितनीवी-
व्याख्यायां रत्नपेटिकाख्यायां
नीतिमत्पद्धतिः।
नवमी ॥

धनधान्यपद्धतिः ॥

आभिमुख्यदशामात्रादादर्श इव सज्जनः ।
शीघ्रं रक्तमरक्तं वा गृह्णाति स्वप्रसादतः ॥ १ ॥

आभिमुख्येति ॥ सज्जनो दाता आभिमुख्यदशामात्राद्याचकस्याभिमुखागमनमात्रेण, न तु याच्ञापर्यन्तं, याच्ञायाः परक्लेशावहत्वात्, रक्तं रागवन्तं, फलाभिलाषिणम्, अरक्तं तद्रहितं वा, लाक्षादिरागयुक्तद्रव्यं तद्रहितद्रव्यं वा, स्वप्रसादतः 'कृतज्ञतोपकर्तृत्वं भूयो दोषानभिज्ञता । एष प्रसादश्चित्तानां लक्षणैरुदाहृतः ।' इत्युक्तचित्तगुणात् स्वनैर्मल्यतश्च, आदर्श इव, गृह्णाति अनुगृह्णाति, ग्रहणसाधनं भवति च, साधने कर्तृत्वोपचारः । स्वात्मदातृत्वप्रकाशनेन स्वाश्रितेषु भगवतः 'उदाराः सर्व एवैते' इति स्वयूक्तिः । सज्जनप्रकृतिस्तादृशीति भावः । **उपमालङ्कारः ॥ १ ॥**

अप्यनावर्जिताः स्वेन फलरागेण सन्नताः ।
अर्भकैरपि गृह्यन्ते साधुसन्तानशाखिनः ॥ २ ॥

अपीति ॥ अनावर्जिताः स्वेन स्वार्थफलाभिलाषेण अनाकृष्टा अपि अत्युन्नतत्वादनम्या अपि, फलरागेण सन्नताः परार्थफलग्रहणाभिलाषेण सन्नताः स्वयमेव सम्यङ्नताः, साधव एव सन्तानशाखिनः

अर्भकैरसमर्थैरपि गृह्यन्ते, हस्तापचेयफला भवन्ति । **श्लेषोत्थापित-तादृप्यरूपकालङ्कारः** ॥ २ ॥

धिनोतीति धनं, तद्धि लौकिकं न भवति, तस्य 'अर्थानामार्जने दुःखम्' इत्यादिना दुःखहेतुत्वात्, अतस्तत्परित्यागेन ये आत्मतत्परास्त एव सुखिन इत्याह--

निर्मुक्तभवनक्षेत्राः स्युः सदागतिनिर्वृताः ।
प्राप्ते भयविपर्यासे भोगिनः खलु भोगिनः ॥ ३ ॥

निर्मुक्तेति ॥ निर्मुक्तानि त्यक्तानि, भवनानि गृहाः क्षेत्राणि च यैस्ते तथोक्ताः, 'लोकेषणायाश्च पुत्रेषणायाश्च वित्तेषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरति,' 'अत्र ब्रह्म समश्नुते' 'इमं च लोकममुं च परित्यज्यात्मानमन्विच्छेत्' इत्यादिभिरात्मानुभवशालिन इत्यर्थः । सतामागतौ प्राप्तौ निर्वृताः, भयविपर्यासे प्राप्तेऽपि महाप्रलयादौ प्राप्तेऽपि, भोगिनः सुखवन्तः, भोगिनः स्युः खलु फणिनः स्युः खलु । **श्लेषभित्तिकाध्यवसायनिबन्धनातिशयोक्तिः** । फणिपक्षे निर्मुक्तानि मुक्तकञ्चुकानि भवनसदृशानि क्षेत्राणि शरीराणि येषां ते तथोक्ताः, सदागतिना वाताहारेण निर्वृता इत्यर्थः ॥ ३ ॥

सर्वेषामुत्तरामाशां धनदो यः प्रतीक्षते ।
सत्यं मनुष्यधर्मैव स तु पुण्यजनेश्वरः ॥ ४ ॥

सर्वेषामिति ॥ सर्वेषामुत्तरां उत्कृष्टां आशां स्वस्माद्धनग्रहणाभिलाषं, यो वदान्यः, प्रतीक्षते परिपालयति, स मनुष्यधर्मैव, पुरु

पधर्मवान् स एव पुरुष इत्यर्थः । पुण्यजनानां ईश्वरश्च । कुबेरोऽत्र निदर्शनम् । यः कुबेरः सर्वेषामुत्तरामाशां उत्तरदिशम् परिपालयति सः, मनुष्यस्येव आचारो यस्य मनुष्यधर्मा, सप्तम्युपमानेत्यादिना समासः । धर्मादनिच्केवलादिति समासान्तोऽनिच् । भद्रमङ्गलवारादिशब्दवद्विपरीतलक्षणया पुण्यजनशब्दो राक्षसे प्रसिद्धः, तेषां ईश्वरः पुण्यजनेश्वरः । 'देहीति वदतां प्रायः प्रसीदन्प्रत्युवाच सः । ललितध्वनिभिर्लक्ष्मीलीलाकमलषट्पदैः ॥' 'चातकस्त्रिचतुरान् पयःकणान् याचते जलधरं पिपासया । सोऽपि पूरयति विश्वमम्भसा हन्त हन्त महतामुदारता ॥' इत्यादीनीहानुसन्धेयानि ॥ ४ ॥

येषां हिरण्यकशिपुक्षेत्रदानकरः करः ।
तेषां तिर्यङ्मुखत्वेऽपि पुरुषत्वं न हीयते ॥ ५ ॥

येषामिति ॥ येषां करः हस्तः हिरण्यं च, कशिपु अन्नवस्त्रे 'कशिपु त्वन्नमाच्छादनं द्वयम्' इत्यमरः । तच्च क्षेत्राणि च तेषां दानं करोतीति दानकरः, तेषां तिर्यग्वृत्तं मुखं येषां ते तथोक्ताः तेषां भावः तिर्यङ्मुखत्वम्, तस्मिन्नपि पुरुषत्वं श्रेष्ठत्वम्, न हीयते न त्यज्यते । अत्र नरसिंहो निदर्शनम्, स हि हिरण्यकशिपोः क्षेत्रदानं शरीरच्छेदनं, करेण कृतवान्, तिर्यङ्मुखः सिंहस्य तिर्यग्जातित्वात् पुरुषश्च । 'भगवानिति शब्दोऽयं तथा पुरुष इत्यपि । निरुपाधि च वर्तेते वासुदेवे सनातने, इति तस्य पुरुषधर्मपौष्कल्यात् ॥ ५ ॥

मुख्यदानोदकक्लिन्नकरः ख्यातक्षमाधृतिः ।
लोकपालाश्रितः कश्चिदनाशावारणः कथम् ॥ ६ ॥

मुख्येति ॥ मुख्यानां श्रेष्ठवस्तूनां, यद्वा मुख्यानां ब्राह्मणानाम्, दानोदकेन क्लिन्नः आर्द्रीभूतः करो यस्य स तथोक्तः, मुखोद्भवेन मदोदकेन क्लिन्नशुण्डादण्डश्च, ख्याते प्रसिद्धे क्षमा क्षान्तिः धृतिः धैर्यं च यस्य स तथोक्तः, अन्यत्र ख्याता क्षमायाः भूमेः धृतिर्धारणं यस्य स इत्यर्थः। लोकपालाश्रितः कश्चित् सचिवः दिक्पालाश्रितश्च, कथमनाशावारणः अर्थिकामाशां पूरयत्येव, कथं न दिग्गज इत्यर्थः। अत्र दिग्गजो निदर्शनम्। अत्र मामकश्लोकः— 'आश्रित्य प्रभुमेकं नित्यं पूर्णः स्वयं परं पूर्णः। कुरुते तृतीयसवनं प्राप्याग्रयणं यथैव षोडशिनम्' ॥ ६ ॥

क्षोभितो विबुधैः कश्चिद्गम्भीरमधुराशयः।
चन्द्ररत्नगजाश्वादिसहितां दिशति श्रियम् ॥ ७ ॥

क्षोभित इति ॥ विबुधैः विद्वद्भिः क्षोभितः प्रसङ्गैः उल्लासितः, अन्यत्र विबुधैः देवैः मथितः, चन्द्रः, कर्पूरम्, अन्यत्र चन्द्रः, श्रियं संपत्तिं लक्ष्मीं च। स्पष्टमन्यत्। समुद्रो निदर्शनम्॥ ७ ॥

परमपुरुषं निदर्शनीकृत्य कस्यचिन्महौदार्यमाह—

अपुनर्देहिशब्दार्थमप्रत्युपकृतिक्षमम्।
अर्थिनं कुरुते कश्चित्पुनरावृत्तिवर्जितम् ॥ ८ ॥

अपुनरिति ॥ कश्चित् अर्थिनं, अपुनर्देहिशब्दार्थ— देहि वितरेति शब्दस्यार्थो यस्य पुनर्नास्ति सोऽपुनर्देहिशब्दार्थः तं, भगवत्पक्षे स्वाश्रयणानन्तरं पुनर्देही देहवानिति शब्दस्यार्थो यथा न स्यात् तथा

करोतीत्यर्थः । महोपकारदानेन अर्थिनः प्रत्युपकारं कर्तुमयोग्यत्वमाह—अप्रत्युपकृतिक्षममिति, स्वल्पप्रदानेन पुरुषार्थार्थं पुनरावर्तिनं करोति किं ? नेत्याह—पुनरावृत्तिवर्जितमिति । भगवांश्च—'न च पुनरावर्तते' 'आ ब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन । मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते' इत्युक्तं करोतीत्यर्थः । अपुनःप्रार्थनीयस्य प्रार्थिताधिकदायिनः । अर्थिनः प्रथमे तस्य चरमान् पर्यपूरयन्' इत्यादिक्रमनु सन्धेयम् ॥ ८ ॥

* वदान्यश्च कदर्यश्च गृहीतस्थिरलोभतः ।
स्वानर्थान्संचिनोत्यर्थान्परानर्थैरयोजयन् ॥ ९ ॥

* अनिःशेषितदातव्यं वदान्यदिति वादिनम् ।
नोपसर्पति सव्रीडो व्रीडाकुलवधूरिव ॥ १० ॥

'श्रद्धया देयम् ।' 'यद्वातुः सौम्यता सेयं पूर्णेन्दोरकलङ्कता' 'सम्प्रीतिभोज्यान्यन्नानि,' 'प्रियवाग्दानशीलश्च वदान्यः परिकीर्तितः' इति महादानमपि प्रियोक्तिपूर्वकमेव सर्वोत्कृष्टमित्याह—

त्वचं मांसं जीवं यदपि ददुरस्थीनि पृथिवीं
श्रियं रत्नाधीशं त्रिदशतरुमैरावतमपि ।
तदेतत्प्रत्येकं मिलितमपि नालं तुलयितुं
मनस्कारोपेतां स्थिरमधुरकल्योक्तिकणिकाम् ॥

* अनयोः श्लोकयोः रत्नपेटिकाव्याख्या नोपलभ्यते ।

त्वचमिति ॥ त्वचं कर्णः शरीराभिन्नं कवचं शरीरात् च्छित्वा ददौ। मांसं शिबिः श्येनाय स्वोरुमांसं कपोतरक्षणाय ददौ। जीवं कपोतः स्वसमीपागताय व्याधाय स्वभार्याप्राणान् ददौ। अस्थीनि इन्द्राय दधीचिरस्थीनि ददौ। पृथिवीं परशुरामः कश्यपाय ददौ। श्रियं रत्नाधीशं त्रिदशतरुं ऐरावतमपि समुद्रो ददौ। एवं यदपि ददुः, तदेतत्प्रत्येकं वा मिलितमपि वा, मनस्कारोपेतां मनस्कारः चित्ताभोगः, 'चित्ताभोगो मनस्कारः' इत्यमरः। चित्तस्याभोगस्तात्पर्यमिति सर्वानन्दः। एकस्मिन् विषये पुनः पुनः चित्तवृत्तिराभोग इति पञ्जिका। तेनोपेतां, स्थिरां कालान्तरेपि स्मर्तव्यां, मधुरां हृदयानन्दविधायिनीं, कल्यां शुभात्मिकां 'स्यात्कल्या तु शुभात्मिका' इत्यमरः। उक्तिकणिकां सूनृतवाग्लेशमपि तुलयितुं समीकर्तुं नालं न पर्याप्तम्। अतिथिविषये 'अभावे भूमिरुदकं तृणानि कल्याणी वागित्येतानि वै सतोऽगारे न क्षीयन्ते' इत्यापस्तंबः। 'सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात् सत्यमप्रियम्। प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः।' 'अव्याहृतं व्याहृताच्छ्रेय आहुः, सत्यं वदेद्व्याहृतं तद्द्वितीयम्। प्रियं वदेद्व्याहृतं तत्तृतीयम्, धर्म्यं वदेद्व्याहृतं तच्चतुर्थम्।' इति महाभारते। 'चन्दनं शीतलं लोके चन्दनादपि चन्द्रमाः। चन्द्रचन्दनयोर्मध्ये साधुवाक्यं सुशीतलम्।' इति चाटुकाराः ॥ ११ ॥

परमपुरुषो महोदारान् परार्थमेवासृजदित्याह—

अनिर्घातं धाराधरमशमनीयं निधिरपा-
मकाठिन्यं चिन्तामणिमजडभूतं सुरतरुम्।

अभित्त्वोपादाय प्रभुरपशुवृत्तिं च सुरभिं
परार्थैकस्वार्थानकृत पुरुषानादिपुरुषः ॥ १२ ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य
कृतिषु सुभाषितनीव्यां
धनधान्यपद्धतिः
दशमी ॥

अनिर्घातमिति ॥ प्रभुः सकलविलक्षणनिर्माणसमर्थः, आदिपुरुषः परार्थ एक एव स्वार्थो येषां ते तथोक्ताः तान् पुरुषान् अकृतेत्यन्वयः । कथं कृत्वा अभित्त्वा—अनिर्घातं धाराधरं, अशमनीयमपान्निधिं, अकाठिन्यं चिन्तामणिम्, अजडभूतं सुरतरुं, अपशुवृत्तिं सुरभिं च उपादाय गृहीत्वा अभित्त्वा सर्वानेकीकृत्येत्यर्थः । पूर्वसृष्टस्य धाराधरस्य वज्रनिर्घातो दोषः, अपान्निधेः शमनीयत्वं दोषः, चिन्तामणेः काठिन्यं दोषः, सुरतरोः जडत्वं दोषः, सुरभेः पशुवृत्तिर्दोष इति तान्विहाय दोषरहितैः तादृशपदार्थैरेकीकृत्य सृष्टवानित्यर्थः । अनेन निस्समाभ्यधिकमौदार्यं प्रतीयते, निर्घातशब्देनात्र परुषवाक्यं विवक्षितम्, शमनीयत्वं परार्थशून्यत्वं विवक्षितम्, काठिन्यमत्र निर्दयत्वं विवक्षितम् । जडत्वमत्र मन्दत्वं विवक्षितम्, पशुवृत्तिः पात्रापात्रविशेषानभिज्ञता विवक्षिता । अनिर्घातं धाराधरमित्यादिना

प्रसिद्धेभ्यो व्यतिरेकः, तदुपादानासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः । तद्भेदेऽप्यभेदातिशयोक्तिश्चेति तेषां सङ्करः ॥ १२ ॥

इति श्रीमच्छ्रीशैलकुलतिलकस्य वेङ्कटाचार्यसोमसुतः सुतस्य
श्रीश्रीनिवासविदुषः कृतिषु सुभाषितनीवी-
व्याख्यायां रत्नपेटिकाख्यायां
धनधान्यपद्धतिः
दशमी ॥



सत्कविपद्धतिः ।

अपङ्किलधियः शुद्धाः साधुमानसवृत्तयः ।
वमन्ति श्रुतिजीवातुं ध्वनिं नवरसास्पदम् ॥ १ ॥

अपङ्किलेति ॥ अपङ्किलधियः रागमोहादिकालुष्यरहितबुद्धयः, अनेन वक्तृवैलक्षण्येनोपादेयत्वसिद्धिः, अन्यत्र कर्दमवत्सु क्षुद्रसरस्त्वपेक्षारहिताः, शुद्धाः शुचयः धवलाश्च, साधुमानसे समीचीनमनोव्यापारे भगवद्भक्त्यादौ मानससरसि च वृत्तिर्येषां ते तथोक्ताः, नवरसास्पदं शृङ्गारादिनवरसाभिव्यञ्जकम् नूतनोदकपानसम्भवं च, श्रुतिजीवातुं वेदमूलम् श्रोत्रानन्दकरं च, ध्वनिं वमन्ति प्रकटयन्ति, गौणवृत्त्याश्रयणाद्वमन्ति इत्यस्य न ग्राम्यता। तदुक्तम् 'निष्ठ्यूतोद्गीर्णवान्तादिगौणवृत्तिव्यपाश्रयात्। अतिसुन्दरमन्यत्र ग्राम्यकक्ष्यां विगाहते' इति। हंससाम्यं गम्यते, 'मधुरं मधु पीयूषं तस्मात्तस्मात्कवेर्वचः ॥'

महानायकमेव स्वकाव्यस्य विषयं कुर्वन् प्रतिभान्वितो महाकविर्भवतीत्याह—

महापुरुषबद्धात्मा सर्गादिप्रथितोदयः ।
पश्यावदातया वाचा सेव्यते चतुराननः॥ २ ॥

महापुरुषेति ॥ चतुरं रसभावादिबन्धुरकाव्यनिर्माणचतुरम् आननं वक्त्रं यस्य स तथोक्तः; 'यद्धि मनसा ध्यायति, तद्वाचा वदति'

इति बुद्धिस्थं चातुर्यं तदनुशब्दाभिलापिनि आनने आरोपितम्; चतुर्मुखश्च, महापुरुषे धीरोदात्तादिनायके परमपुरुषे च बद्धः वर्णयितृत्वेन सम्बद्धः आत्मा मनो यस्य स तथोक्तः, परमपुरुषध्यानासक्तमनाश्च; सर्गादिषु सर्गकाण्डसमुच्छ्वासादिसंज्ञकपरिच्छेदेषु विषये प्रथितः प्रसिद्धः उदयः बुद्धिप्रतिभादिरूपाभ्युदयो यस्य स तथोक्तः, सृष्टयादिविषये प्रसिद्धोत्पत्तिश्च। अवदातया शुद्धया दोषरहितयेति यावत्, धवलया च वाचा वाग्देव्या च सेव्यते। पश्य मनसा विचारयेत्यर्थः। चतुर्मुखो निदर्शनम् ॥ २ ॥

सत्यवान् महाकविर्दुर्लभ इत्याह—

विशुद्धवर्णललिता गुणालंकारशालिनी।
सरसा भारती यस्य स सत्ये कः प्रतिष्ठितः ॥ ३ ॥

विशुद्धेति ॥ विशुद्धवर्णललिता रसानुगुण्येन असंयुक्तकोमलवर्णादिमनोहरा, शुभ्रवर्णा च, गुणालङ्कारशालिनी प्रसादमाधुर्यादिगुणैरुपमानुप्रासाद्यलङ्कारैश्च शालिनी। अन्यत्र सौन्दर्यादिगुणैः कटककेयूराद्यलङ्कारैश्च शालिनी, सरसा रसाभिव्यञ्जका भर्तरि सानुरागा च, भारती वाक् वाग्देवता च यस्य सः, सत्ये कः प्रतिष्ठितः कोऽपि, भगवानेव यस्य स्तुतेर्विषयः। सत्ये ब्रह्मणि कः कोऽपि प्रतिष्ठितः। 'इषुक्षयान्निवर्तन्ते नान्तरिक्षक्षितिक्षयात्। मतिक्षयान्निवर्तन्ते न गोविन्दगुणक्षयात्' 'वितथा वेदपान्थानां यत्र सायंगृहा गतिः।' 'यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः' इत्युक्त-

रीत्या परमपुरुषमहिमवर्णनप्रवृत्तस्य सत्प्रतिष्ठितत्वस्य संभवान्न व्यतिरेके तात्पर्यम् । अपि तु दौर्लभ्य एव तात्पर्यम्; 'स महात्मा सुदुर्लभः' इतिवत् । अन्यत्र सत्ये सत्यलोके कः ब्रह्मा प्रतिष्ठित इत्यर्थः । चतुर्मुखोऽत्र निदर्शनम् ॥ ३ ॥

'वार्ता च कौतुककरी विमला च विद्या लोकोत्तरः परिमलश्च कुरङ्गनाभेः । तैलस्य बिन्दुरिव वारिणि दुर्निवारमेतत्त्रयं प्रसरति स्वयमेव लोके ॥' इत्युक्तरीत्या परिशुद्धविद्या समुद्रपरिवेष्टितभूमण्डले स्वयमेव प्रसरतीत्याह—

कुतश्चिदचलस्थानात्प्रयान्ती सागरान्तिकम् ।
दृश्यादृश्यतनुर्भाति कृत्यभीष्टा सरस्वती ॥ ४ ॥

कुत इति ॥ कुतश्चिदचलस्थानात् देशान्तरं असञ्चरतोऽपि कवेरित्यर्थः पर्वतस्थानाच्च, सागरान्तिकं प्रयान्ती समुद्रपर्यन्तं गच्छन्ती दृश्यादृश्यतनुः क्वचिद्गूढव्यङ्ग्याकृतिः क्वचिदगूढव्यङ्ग्याकृतिः, यद्वा पण्डितेषु दृश्यतनुः अपण्डितेषु अदृश्यतनुः, अन्यत्र सरस्वत्याख्यनद्या गुप्तगामित्वात् दृश्यादृश्यतनुत्वं प्रसिद्धम् । कृतिषु प्रबन्धेषु विषये अभीष्टा कृतीनां विदुषां स्नानार्घ्यमभीष्टा च, सरस्वती विद्या वेगाख्यनदी च भाति, नदी निदर्शनम् ॥ ४ ॥

विदुषां सूक्तयो मुक्तात्मतां संपादयन्त्यः श्रोत्रानन्दाय भवन्तीत्याह—

प्रभूतोदितमुक्ताभिर्भूयते सूक्तिशुक्तिभिः ।
सुदृशां कर्णपूराय तादृक्त्वं फलभेदतः ॥ ५ ॥

प्रभूतेति ॥ प्रभूतं अधिकं यथा भवति तथा उदिता आविर्भूता मुक्ता याभ्यस्ताभ्यः सूक्तिशुक्तिभिः, शुक्तिसदृशसूक्तिभिः सूक्तिसदृशशुक्तिभिश्च, सुदृशां विदुषां कर्णपूराय श्रोत्रानन्दाय, स्त्रीणां कर्णावतंसाय च भूयते भावे लट्। श्रोत्रानन्दावहत्वं कथं? कथं वा कर्णावतंसार्थत्वं शुक्तीनामित्यत्राह 'तादृक्त्वं फलभेदतः' इति, अर्थभेदवैचित्र्यात् गर्भीकृतमौक्तिकानां शुक्तीनां भेदनाच्च। शुक्तिसाम्यम् ॥ ५ ॥

'सा कविता सा वनिता यस्याः श्रवणेन दर्शनेनापि। कविहृदयं युवहृदयं सरलं तरलं च सत्वरं भवति' इत्युक्तरीत्या सतां सूक्तिर्विरुद्धं विचारितापि स्वां शोभामपरित्यजन्ती भगवदानन्दावहेत्याह—

प्रतीपमुपमृष्टापि स्वामभिख्यां न मुञ्चति।
कालिकेव सतां सूक्तिस्तादृशद्युतिनन्दनी ॥ ६ ॥

प्रतीपमिति ॥ प्रतीपं प्रतिकूलं, उपमृष्टापि विचारितापि, कालिकेव मेघपङ्क्तिरिव, स्वामभिख्यां शोभां सूक्तिरित्याख्यां वा नमुञ्चती अत्यजन्ती, मेघपङ्क्तिरपि प्रतीपं प्रतिलोमं उपमृष्टापि करतलादिना घट्टितापि स्वां शोभां न मुञ्चति, तद्वदित्यर्थः; सतां सूक्तिः तादृशद्युतिः भगवान् तस्य नन्दनी सन्तोषावहा भवति। नमुञ्चतीत्यत्र आच्छीनद्योर्नुमित्यस्य वैकल्पिकत्वान्नुमभावः, नशब्दस्य सुप्सुपेति समासः ॥ ६ ॥

'युक्तियुक्तं वचो ग्राह्यं बालादपि सुभाषितम्' इति न्यायेन पशुपालवाक्यमप्यर्थवच्चेद्ग्राह्यमित्याह—

अपार्थेतरयुक्तानां व्याससङ्ग्रहशालिनाम् ।
अपि गोपालगीतानां निवेशो निगमादिषु ॥ ७ ॥

अपार्थेति ॥ अपार्थेतरः सदर्थः अर्जुनश्च, तेन युक्तानाम्, व्यासो विस्तरः संग्रहः सङ्क्षेपः तेन शालिनाम्, ग्रन्थकारिणामेष स्वभावः, 'यत्समासव्यासधारणम्' इति । व्यासस्य बादरायणस्य संग्रहेण ग्रथनेन शालिनां च; गोपालगीतानां पशुपालश्लोकानामपि श्रीकृष्णोक्तानामपि; निगमादिषु निवेशः प्रमाणेषु ग्रहो भवति, गीतोपनिषदिति वेदान्ततुल्यत्वेन ग्रहो भवतीत्यर्थः । गीतोपनिषन्निदर्शनम् ॥ ७ ॥

'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥' इति काव्यस्यानेकपुरुषार्थसाधनत्वात् लोहितपायिगोपीडन्यायेन केनचित्कुकविना सरसकविशब्दं न्यक्कृत्य क्रियमाणः शब्दाडम्बरो वृथेत्याह—

जलाशयस्य घोषेण जातलौल्यस्य भूयसा ।
कविशब्दं तिरोधाय कश्चिदर्थो न साध्यते ॥ ८ ॥

जलाशयस्येति ॥ जातं लौल्यं अहं कविरिति चापल्यं वाग्वादिना तरलत्वं च यस्य तथोक्तस्य ; जलाशयस्य मन्दबुद्धेः लडयोरभेदात्, सरसश्च; भूयसा घोषेण कवेः सत्कवेः शब्दं, के जले विः पक्षी हंसः तस्य शब्दं तिरोधाय परैरश्रुतं कृत्वा, कश्चिदप्यर्थो न साध्यते, कविशब्दकृतमाधुर्यादिकं स्वयं न बिभर्ति—इत्यर्थः ॥ ८ ॥

'मणिना वलयं वलयेन मणिर्मणिना वलयेन विभाति करः ।

कविना च विभुर्विभुना च कविः कविना विभुना च विभाति सभा।' 'अपत्यं च कवित्वं च द्वयमेव शुभास्पदम्' इत्युक्तरीत्या कविताभाग्यवानेन प्रकाशत इत्याह—

सदा नवोक्तिमहितः प्रतिरुन्धन्प्रतीपगान्।
प्रथितः काव्यनाम्नापि कविरेकः प्रकाशते॥ ९॥

सदेति॥ सदा नवोक्त्या 'प्रज्ञां नवनवोन्मेषशालिनीं प्रतिभां विदुः' इत्युक्तप्रतिभया विचित्रापूर्वशब्दार्थयुक्तरचनया, महितः सर्वैः पूजितः, दानवानां उक्तिभिः सह वर्तत इति सदानवोक्तिः स चासौ महितश्चेति; शुक्रपक्षे खञ्जकुब्जवद्विशेषणसमासः। प्रतीपगान् प्रतीपवर्तिनः कुकवीन् प्रतिरुन्धन् प्रतिकूलवर्तिग्रहान् प्रतिरुन्धंश्च, शुक्रदृष्टेस्तद्दोषनिवर्तकत्वादिति भावः; काव्यनाम्नापि प्रथितः भारविः माघ इत्यादिकाव्यनामात्मनापि स्वनामप्रसिद्धिमान्, अपिशब्देन कालिदास इत्यादि केवलनाम्ना च प्रसिद्धः, 'शुक्रो दैत्यगुरुः काव्यः' इति काव्यनाम्ना च प्रथित इति च; एकः मुख्यः कविः आदिर्वर्णयिता द्वितीयः शुक्रश्च, प्रकाशते दीप्यते। शुक्रो निदर्शनम्॥ ९॥

कश्चिन्महाकविः स्वयमेकदेशस्थितोऽपि कीर्त्या सर्वदिग्व्याप्तो भवतीत्याह—

पूर्वकल्पप्रकारेण पुरुषार्थप्रवृत्तया।
विचित्रसृष्ट्या विहरन्व्याप्तः कश्चिन्महानपि॥ १०॥

पूर्वकल्पेति॥ 'सवाग्विसर्गो जनताघविप्लवो यस्मिन् प्रति-

श्लोकमबद्धमस्त्यपि । नामान्यनन्तस्य यशोङ्कितानि गृह्णन्ति गायन्ति गृणन्ति साधवः ॥' इति सत्कवितायाः भगवच्चरित्रवर्णने पापनिवर्तकत्वात् सर्वपुरुषार्थहेतुत्वात् महानपि धनादिना अधिकोऽपि कश्चित्परमपुरुष इति 'महान् प्रभुर्वै पुरुषः सत्त्वस्यैव प्रवर्तकः ।' इति श्रुतिप्रसिद्धेः । पूर्वकल्पप्रकारेण आदिकवीनां वाल्मीकिप्रभृतीनां निर्माणप्रकारेण 'धाता यथा पूर्वमकल्पयत्' इति श्रुतिनिर्दिष्टपूर्वब्रह्मकल्पप्रकारेण च, पुरुषार्थप्रवृत्तया, 'यशसेऽर्थकृते' इत्युक्तप्रयोजनार्थं प्रवृत्तया, पुरुषस्य करणकलेवरादिनिर्माणार्थं प्रवृत्तया च; विचित्रसृष्ट्या रसभावबंधुरशब्दार्थचमत्कारकल्पनया विहरन्, व्याप्तः कीर्त्या सर्वत्र व्याप्तः, स्वरूपेण सर्वत्र व्याप्तश्च । परमपुरुषो निदर्शनम् ॥

क्षीरसमुद्रोत्पन्नसुधेव सत्कविसूक्तिरास्वादनीया भवतीत्याह——

मतिमन्थजवेन लब्धवर्णा
प्रतिपन्ना विबुधैरनन्यभक्तैः ।
सुकवेरनघा नयस्य सूक्तिः
स्वदते दुग्धपयोनिधेः सुधेव ॥ ११ ॥

मतिमन्थेति॥ अनन्यभक्तैः भगवद्भक्तैः अमृतातिरिक्तान्नरहितैश्च, विबुधैः विद्वद्भिः देवैश्च, मतिमन्थजवेन मन्थसदृशबुद्ध्यतिशयेन मतिसदृशमन्थवेगेन च, प्रतिपन्ना लब्धा वर्णा यस्याः सा तथोक्ता, लब्धः वर्णः शुभ्रवर्णो यस्याः सा तथोक्ता च; अनघा दोषरहिता दुःखविरोधिनी च; सुकवेर्नयस्य सूक्तिः नीतिसम्बन्धिनी सूक्तिः, दुग्धपयोनिधेः सुधेव स्वदते रोचते ॥ ११ ॥

भाग्यवशेन स्वयमेव कस्मिंश्चिज्जने वाल्मीकाविव कविता प्रसरति चेत्सैव कविता, न यत्नसाध्या, तादृशी च क्वचिद्भवतीत्याह—

मनुष्यासप्राचेतसपरिषदर्हा क्वचिदियं
सुधासिक्ता सूक्तिः स्वयमुदयमन्विच्छति जने ।
निरुन्ध्युः के विन्ध्याचलविकटसंध्यानटजटा-
परिभ्रान्ता पङ्क्तेरुपरि यदि गङ्गा निपतति ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य
कृतिषु सुभाषितनीव्यां
सत्कविपद्धतिः
एकादशी ॥

मनुष्यासेति ॥ मनुष्यासप्राचेतसपरिषदर्हा सुधासिक्तारसभरिता सूक्तिः, जने पामरेऽपि स्वयमुदयमाविर्भावं अन्विच्छति अपेक्षते, तत्र निदर्शनमाह— निरुन्ध्युरिति । विन्ध्याचलवद्विकटा निम्नोन्नताः सन्ध्यानटस्य शिवस्य या जटास्तत्र परिभ्रान्ता गङ्गा पङ्क्तेरुपरि यदि निपतति के निरुन्धुः, न केऽपीत्यर्थः ॥ १२ ॥

इति श्रीमच्छ्रीशैलकुलतिलकस्य वेङ्कटाचार्यसोमसुतः सुतस्य
श्रीश्रीनिवासविदुषः कृतिषु सुभाषितनीवी-
व्याख्यायां रत्नपेटिकाख्यायां
सत्कविपद्धतिः
एकादशी ॥

परीक्षितपद्धतिः ॥

'सहसा विदधीत न क्रियामविवेकः परमापदां पदम्। वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः' इति नीतिमनुसृत्य परीक्षितपद्धतिमाह—

काकानां कोकिलानां च सीमाभेदः कथं भवेत्।
यदि विश्वसृजा साक्षं न कृता कर्णशष्कुली ॥ १ ॥

काकानामिति ॥ विश्वसृजा ब्रह्मणा अक्षिभ्यां सहितं यथा भवति तथा साक्षं, 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः; बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षजिति षच्। कर्णशष्कुली कर्णपाशी, न कृता यदि, 'शष्कुली कर्णपाश्यपि' इत्यमरः। काकानां कोकिलानां च सीमाया मर्यादायाः, भेदः कथं भवेत्; कर्णसृष्ट्यभावे काककोकिलभेदो न जायेत, अक्षिसृष्ट्या काककोकिलसाम्यमेव गृहीतम्, तत्र तद्भेदनिग्राहिकर्णसृष्ट्या अयं काकः अयं कोकिल इति ज्ञायत इत्यर्थः। परमपुरुषेणैव लोकहितार्थं समीचीनप्रमाणानि सम्पादितानि, ततश्चापातज्ञानेन सदसद्विशेषाग्रहेऽपि विशेषग्राहकैः प्रमाणैः सम्यक् परीक्ष्य सद्वस्तूपाददीत, असद्वस्तु त्यजेदिति भावः ॥ १ ॥

'ये तत्र ब्राह्मणाः सम्मर्शिनः, युक्ता आयुक्ताः, अलूक्षा धर्मकामाः स्युः, यथाते तत्र वर्तेरन्, तथा तत्र वर्तेथाः' इत्युक्तरीत्या वृत्तादि-

धर्मसन्देहे वृद्धान् पृच्छेत्, तेऽपि तत्र सम्यगुपदिशन्तीत्यभिप्रेत्याह—

छन्दःप्रत्ययशुद्धात्मा पश्यन्यतिगणस्थितीः ।
वर्णादिनियतं वृत्तं नियुङ्क्ते गौरवादिवित् ॥ २ ॥

छन्द इति ॥ छन्दःप्रत्ययेन वेदार्थज्ञानेन छन्दःशास्त्रज्ञानेन च, शुद्धः सन्देहरहितः आत्मा मनो यस्य स तथोक्तः, यतीनां व्रतिनां गणस्थितीः, पश्यन् विचारयन्, 'ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते' इत्यमरः । 'यतिर्विच्छेदसंज्ञितः' इत्युक्तयतिगणस्थितीश्च; अत्र विच्छेदाभावो दोषः, अत्र विच्छेदाभावो गुण इत्यादिस्थितीश्च पश्यन्, गौरवादिवित् गुरुभावं प्राप्तवान्, वर्णानां गुरुत्वलघुत्वाद्यभिज्ञश्च, वर्णादिनियतं ब्राह्मणादिवर्णानियतं अक्षरगणादिनियतं च, वृत्तं आचारं आर्यादिवृत्तं च, नियुङ्क्ते उपदिशति; अतो वृद्धान् दृष्ट्वा अनुतिष्ठेदिति भावः ॥ २ ॥

सदसद्विवेकः परिशुद्धमुखादवगन्तव्य इत्याह—

सुवर्णमपि दुर्वर्णं युक्त्या दर्शयितुं क्वचित् ।
व्यनक्ति शुद्धिं सहसा शुचिरेकः स्वतैक्ष्ण्यतः ॥ ३ ॥

सुवर्णमपीति ॥ एकः शुचिः अभिजनविद्यावृत्तैः शुद्धः बहिश्च, 'शुचिरप्यित्तम्' इत्यमरः । क्वचित् पुरुषे हिरण्यादौ च, युक्त्या स्वयोगेन, सुवर्णं शोभनब्राह्मणादिजातिं दुर्वर्णं शूद्रादिजातिं च, शूद्रादिष्वपि केषु चिद्यज्ञोपवीतादिधारणसंभवात्, सुवर्णं शोभनवर्णं दुर्वर्णं च, दर्शयितुं स्वतैक्ष्ण्यतः स्वतेजोमहिम्ना, सहसा शुद्धिं शोभनं

व्वनक्ति प्रकटयति ; यथा अग्निमुखतो हिरण्यरजतादिशुद्धिर्दृश्यते तथा परिशुद्धयोगात् दुष्टादुष्टस्वरूपे ज्ञायेते इति भावः । 'सुवर्णमपि दुर्वर्णं दर्शयितुमिति विरोधस्यार्थान्तरेणाभासितत्वात् **विरोधाभासः** ॥

महात्मसु दुर्जनेनारोपितं दोषं केऽपि न गृह्णन्तीत्याह—

स्वच्छस्वादुविशुद्धानां स्रोतसां कलशोदधेः ।
दोषं केऽपि न मृष्यन्ति दुष्टजिह्मेन कल्पितम् ॥ ४ ॥

स्वच्छेति ॥ दुष्टजिह्मेन दुष्टसर्पेण वासुकिना कल्पितम्, कलशोदधेः क्षीरसमुद्रस्य, स्वच्छस्वादुविशुद्धानां निर्मलमधुरशुभ्राणाम्, स्रोतसाम्, दोषं कालकूटविषम्, केऽपि न मृष्यन्ति न सहन्ते । एवं सत्सु दुष्टैरारोपितं दोषं केऽपि नाङ्गीकुर्वन्तीत्यर्थः ॥ ४ ॥

सतामिह लोके जातं सत्त्वगुणसंस्थापनं योग्यम्, दुष्टानां तु सत्त्वसंस्थापनं अन्यदित्याह—

इहैव भुवने जातं सत्त्वसंस्थापनं क्षमम् ।
गृह्णते किमपि स्वस्थैरन्यत्किमपि जिह्मगैः ॥ ५ ॥

इहेति ॥ इहैव भुवने लोके, जातं संभावितम्, सत्त्वसंस्थापनं स्वगुणवर्धनम्, क्षमं हितम्, 'आहारशुद्धौ सत्वशुद्धिः' इत्युक्तप्रकारेण सत्त्ववृद्धिः सम्पादनीयेत्यर्थः । 'न सत्त्वादारोग्यम्' इति सत्त्वगुणस्यैवात्मनो भवरोगनिवर्तनेनारोगतासम्पादकत्वात् 'इहैव नरकव्याधिचिकित्सां न करोति चेत् । अनौषधमयं प्राप्य सरुजः किं करिष्यति' इति युक्तम् । स्वस्थैः पारलौकिकदुःखमजानद्भिः इद-

मेव भोग्यमिति मन्वानैः जिह्मगैः दुष्टैस्तु अन्यत्किमपि, सत्त्वसंस्थापनमित्यनुषज्यते, सत्त्वं सत्त्वगुणः संस्थाप्यते नाश्यते बलवताऽनेनेति सत्त्वसंस्थापनं रजस्तमोवृद्धिकरं सत्त्वनाशकं वस्तु, गृह्यते सेव्यते, विरुद्धविषयमदिरास्वादः क्रियत इत्यर्थः। अत्र निदर्शनं सर्पाः। जिह्मगैः सर्पैः पातालस्वर्गस्थैः अन्यत्किमपि सत्त्वसंस्थापनं नागसहस्रबलकरं रसं पीयते, तत्तेषां स्वर्गस्थत्वात्सुखावहं एतेषां स्वस्थत्वभ्रान्त्या अन्यद्गृह्यते, तद्दुःखावहमिति भावः। नागलोके तादृशरसोऽस्तीति भारते भीमसेनपातालगमने वर्णितम्। संपूर्वः स्थाधातुः सम्यक्स्थापने नाशने च वर्तते ॥ ५ ॥

दुर्वासनाबलवशात् दुष्टाः सच्छास्त्रं परिहरन्ति चेन्न शास्त्रस्य हानिः, किंतु त एव अज्ञानिन इत्यभिप्रेत्याह—

कलकण्ठगलास्वाद्ये कामस्यास्त्रे निजाङ्कुरे।
निम्बवृत्तिभिरुद्गीर्णे न चूतः परितप्यते ॥ ६ ॥

कलकण्ठेति ॥ कलकण्ठगलास्वाद्ये कोकिलकण्ठास्वादनीये कल्मषनिवर्तनेन तदीयमधुरध्वनिहेतौ, अनेन पापनिवर्तनेन समीचीनज्ञानोत्पत्तिहेताविति गम्यते। कामस्यास्त्रे विषयसुखसाधने, अत्रापि भगवत्कैङ्कर्यादिसुखहेताविति गम्यते। निजाङ्कुरे स्वकीयपल्लवे, निम्बवृत्तिभिरुष्ट्रैः उद्गीर्णे निम्बसंयोगादर्थादास्यप्रविष्टे वान्ते सति चूतो न परितप्यते परितापं नोपैति, जनानां परितापविषयो न भवति, उष्ट्रा एव निद्यन्त इति भावः ॥ तप सन्ताप इत्यस्मात् कर्तरि लट्, दिवादित्वाच्छयन् ॥ ६ ॥

महाजनपरिगृहीतं निकृष्टमपि वस्तु श्रेष्ठं भवतीत्यभिप्रेत्याह—

रत्नाभरणयोग्यानां राजान्तःपुरयोषिताम् ।
क्रीडाकङ्कणनिर्माणकाचोऽपि ललितायते ॥ ७ ॥

रत्नाभरणेति ॥ क्रीडाकङ्कणेषु निर्माणार्थकाचोऽपि मृद्भेदकृतदर्पणोऽपि ललितायते परमभोग्यो भवति । 'भृशादिभ्यो भुव्यच्वेर्लोपश्च, हलः' इति अभूततद्भावे क्यङ् । 'काचाश्मशक्यमृद्भेदहयुजः' इत्यमरः । राजान्तःपुरयोषितामित्यनेन परमैकान्तिनो विवक्षिताः रत्नाभरणयोग्यानामिति महाराजपरिचरणीयत्वं विवक्षितम् । क्रीडाकङ्कणेत्यनेन तत्सेवायोग्यः कश्चिद्बुद्धिमान् निकृष्टोऽपि विवक्षितः ॥ ७ ॥

यत्र सारासारविवेचकाभावेन तुल्यत्वपरिकल्पनं तत्र सतां महतां मौनमेव युक्तमित्यभिप्रेत्याह—

मन्ये किन्नरमुख्यानां मौनं जगति साम्प्रतम् ।
मशकक्वणितं यत्र वीणास्वनविकल्पितम् ॥ ८ ॥

मन्य इति ॥ यत्र मशकक्वणितं मशकध्वनिः वीणास्वनेन विकल्पितं तुल्यं कृतमित्यर्थः । तत्र जगति किन्नरमुख्यानां मौनमेव साम्प्रतं मन्ये, युक्तमिति निश्चिनोमि ॥ ८ ॥

क्वचित्कार्यवशेन निकृष्टपरिग्रहेऽपि हृदयाह्लादिनी प्रवृत्तिर्न भवतीत्याह—

कटूनामिह सार्थत्वात्कामं भवति संग्रहः ।
तथापि वृत्तिर्न तथा रसज्ञानुमतिक्षमा ॥ ९ ॥

कटूनामिति ॥ कटूनां तीक्ष्णानां कोपवतामित्यर्थः । 'रसे कटुः कट्वकार्ये त्रिषु मत्सरतीक्ष्णयोः' इत्यमरः । शुण्ठी पिप्पली मरिचा इति वैद्यशास्त्रप्रसिद्धत्रिकटूनां च, सार्थत्वात् सप्रयोजनत्वात् कामं यथेच्छं संग्रहः स्वीकारो भवति, तथापि वृत्तिः व्यापारः भक्षणं च, तथा समीचीनवत् रसज्ञानां रसिकानां रसज्ञाया जिह्वायाश्चानुमतेरङ्गीकारस्य क्षमा योग्या न भवति । त्रिकटुकं निदर्शनम् ॥ ९ ॥

वेदशास्त्रवत्सु वृथा शब्दो न प्रसरतीत्यभिप्रेत्याह—

नादमङ्कणतालानां लाङ्गलीनटनोचितम् ।
श्रुतिक्षमेषु ग्रामेषु न मूर्छयति गीतिवत् ॥ १० ॥

नादमिति ॥ वेदशास्त्रसमर्थेषु ग्रामेषु लाङ्गलीनां नारिकेलानाम्, नटने वाद्यादिना चलने, उचितमभ्यस्तम्, अङ्कणतालानां च त्वरवर्तितालवृक्षाणां सहभावेन प्रवृत्तं नादम्; श्रुतयः स्वरारम्भकावयवशब्दाः ताभिः क्षमेषु समर्थेषु, ग्रामेषु स्वरसन्दोहेषु, नटनोचितं नाट्योचितम्, तालानां कांस्यवाद्यानाम्, नादं गीतिवत् गीतिष्विव, न मूर्च्छति न वर्धयति । गीतिषु स्वरारोहावरोहणं मूर्छनम्; तत्र तालनादस्य यथारोहावरोहणं नास्ति, तथा तत्र तालनादस्य मेलनं वेदपाठको न सहते, निरर्थकशब्दं न सहत इति भावः ॥ १० ॥

सदसद्विवेचनं कस्यचित् भाग्यवशेन भवति, नाभ्यासादित्याह—

विधिमन्तरेण विहगेन कुतः
पयसोरशिक्ष्यत विवेकविधिः ।

कति वा दिनानि वद पर्यचिनो-
त्कलशीसुतः कबलयन् जलधिम् ॥ ११ ॥

विधिमिति ॥ विहगेन हंसेन, विधिमन्तरेण दैवयत्नं विना, पयसोः क्षीरनीरयोः, विवेकविधिः विविच्यग्रहणम्, कुतोऽशिक्ष्यत अभ्यस्तः, न कुतश्चिदपीत्यर्थः । कलशीसुतः अगस्त्यो वा जलधिं कबलयन् कबलनार्थं कतिवा दिनानि पर्यचिनोत् परिचयमकार्षीत् । वदेति परिचयाद्यभावप्रकटनार्थः ॥ ११ ॥

परिशुद्धविद्य एव श्रेयानित्याह—

एकयाऽपि कलया विशुद्धया
योऽपि कोऽपि भजते गिरीशताम् ।
भूयसीरपि कलाः कलङ्किताः
प्राप्य कश्चिदपचीयते शनैः ॥ १२ ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य
कृतिषु सुभाषितनीव्यां
परीक्षितपद्धतिः
द्वादशी ।

सैषा सुभाषितानां माला महनीयवर्णवृत्तगुणा ।
भावुकसङ्ख्यारूढा प्रियपद्धतिभूषिता जयति ॥

एकयेति ॥ कश्चित्कलङ्किताः सम्यगभ्यासाभावेन अनिश्चितार्थाः, भूयसीः कलाः बह्वीः विद्याः, प्राप्य शनैः अपचीयते क्षीणो भवति, सुदृढविद्यो न भवति, विशुद्धया संप्रदायपूर्वकं सम्यगभ्यस्तया, सुनिश्चितार्थया एकया कलयाऽपि, योऽपि कोऽपि यः कश्चिदपि, गिरि वाचि विषये, ईशतां स्वतन्त्रत्वम् भजते। अत्र चन्द्रः शिवश्च निदर्शनम् ॥ १२ ॥

तुषारगिरिसच्छायं तुलसीदामभूषणम् ।
तुरङ्गवदनं वन्दे तुङ्गसारस्वतप्रदम् ॥

श्रीमते रामानुजाय नमः ।

इति श्रीमच्छ्रीशैलकुलतिलकस्य वेङ्कटाचार्यसोमसुतः सुतस्य
श्रीश्रीनिवासविदुषः कृतिषु सुभाषितनीवी-
व्याख्यायां रत्नपेटिकाख्यायां
परीक्षितपद्धतिः
द्वादशी ।

श्लोकानुक्रमणिका ॥

	पृष्ठम्		पृष्ठम्
अ		अमित्रे विश्वासः	४५
अकिञ्चित्कारिणाम्	२७	अमृतस्यन्दिनं	६०
अङ्गयुक्तः	७३	अवक्रस्तारकाधीशः	३२
अण्डजाः	१५	अव्यवस्थितवृत्तानां	३५
अधिकोन्नतैरपि	२७	अस्तु तावत्	१६
अनङ्गीकृतकामानां	५०	अहार्यः सर्वमध्यस्थः	५१
अनन्तख्यातिसंपन्नः	५०	अहार्येण	६०
अनाकलितमानुष्याः	४४	आहितुण्डिक	५३
अनिर्घातं धाराधरम्	८४	**आ**	
अनिःशेषितदातव्यं	८३	आत्मार्थं युक्त	२३
अनुकर्तुमपह्नोतुं	५२	आभिमुख्यदशा	७९
अनुज्झितसुहृद्भावः	५९	आलोकावधि यद्वशेन	३८
अनेकमुखपापात्मा	२५	**इ**	
अपङ्किलधियः	८७	इहैव भुवने जातम्	९७
अपार्थेतरयुक्तानां	९१	**उ**	
अपि निर्मुक्तभोगेन	४२	उत्पथा दुर्नदाः	२४
अपि सत्पथ	१६	**ए**	
अपि सन्तापशमनाः	४१	एकयापि कलया	१०१
अपुनर्देहिशब्दार्थ	८२	एकयैव गुरोर्दृष्ट्या	६७
अप्यनावर्जिताः	७९	**क**	

	पृष्ठम्
कटूनामिह सार्थत्वात्	९९
कठिनः कृशमूलश्च	४०
कलकण्ठगलास्वाद्ये	९८
कलङ्किनि जले	६५
काकानां कोकिलानां	९५
कामं लिखतु	१५
कामाधिकरणप्राप्तः	७४
कुतश्चिदचलस्थानात्	८९
केन चिद्दान्तकृत्येन	२५
क्षोभितो विबुधैः	८२
ग	
गतिर्ज्योत्स्ना	१९
गरुत्मति सुपक्षतां	५३
गुणजालप्रकर्षे	३१
घ	
घोरास्त्यक्तमिथोवैराः	४३
च	
चकोरानादरं	५६
छ	
छन्दः प्रत्ययशुद्धात्मा	९६
छलिनं सत्कथानर्हम्	२६
छिद्रं जनयताम्	५८
ज	
जनयत्यनले दाहं	५९
जनित्वापि महागोत्रे	२४
जलाशयस्य घोषेण	९१
जातिमात्रशरणाः	३७
जोषमेकपदे	३४
त	
तदेव गृह्यताम्	१४
तमः स्वभावमलिनं	३७
तमिस्राचारिणां	७२
तरतु विवित्सयाब्धिं	४५
तान् घ्नन्ति हन्त	१०
त्वचं मांसं जीवं	८३
द	
दष्टसारङ्ग	१६
दुष्टैरारोपितः	३६
दृष्टपङ्का प्रतिपदं	४०
देशकालविशेषेण	५७
द्विजराजाङ्क	३१
द्विजस्य सितपक्षस्य	३५
ध	
धर्मसेतुनिविष्टानां	४९
धुर्याणामपि	१७
न	

	पृष्ठम्		पृष्ठम्
नद्यास्तोयं	६७	प्रद्युम्नो	७५
नवदलपुटे	११	प्रभूतोदित	८९
नादमङ्कणतालानां	१००	प्रमितिपरिष्कृत	४
निगिरन्तो जगत्प्राणान्	२७	प्रयुक्तं मन्त्रिभिः	७६
निमीलयतु लोचने	२०	प्रशस्तिं विन्दन्ति	५४
निरवधिगुणग्रामे	१२	ब	
निर्मुक्तभवन	८०	बलोत्तरेण	१८
नीचानुस्मरणान्मन्ये	४१	बहु विदधति	१०
नीतिः सतां	७६	म	
प		मण्डूकराविणं	४३
पतनानन्तरम्	३३	मतिमन्थजवेन	९३
पततां हन्त	३३	मनुव्यास	९४
परचिन्तैकनिरताः	२२	मन्ये किन्नर	९९
पश्यति परेषु	५	मरुद्भिः पीड्यमान	५९
पार्थिवानां	७१	महान्तं पुरुषं	६६
पुण्यगन्धाः	५१	महापुरुष	८७
पुंसः कस्यचित्	५६	मित्रे भवति	४२
पूर्वकल्पप्रकारेण	९२	मुक्तानुगुण	४९
प्रतिगृह्णति	५८	मुक्ताहार	२८
प्रकिपत्प्राप्तितः	६३	मुह्यदानोदक	८१
प्रतिपन्नवामदृष्टिः	९	य	
प्रतीपमुप	९०	यत्र पयःप्रभृति	६
प्रथमसुजनाय	२	यमेनोपक्रमे	७६

	पृष्ठम्		पृष्ठम्
येषां हिरण्यकशिपु	८१	मतामेव खपुष्पत्वं	४७
र		मत्पथं छादयन	१७
रत्नाभरण	९९	सदसन्तौ	७२
व		सदानवोक्तिमहितः	९२
वदान्यश्च	८३	सन्नियोगेन	४८
विक्रमाक्रान्त	७०	सर्वेषामुत्तरा	८०
विदधातु धाम	६१	सुदर्शनभृता	१९
विधिमन्तरेण	१००	सुवर्णमपि दुर्वर्ण	९६
विधौ लब्धधृतिः	७६	सुवृत्तस्यावदातस्य	६३
विबुधमहिते	७७	सूत्रं रत्नसमावेशात्	६६
विभुर्बन्धं प्राप्य	६८	स्थलपरिशेषित	८
विशुद्धवर्ण	८८	स्नेहः शैत्यम्	२३
विषमो गुणभेदेन	६४	स्फटिकः स्वभाव	७
विषयेष्वपि	६१	स्वच्छस्वादु	९७
श		स्वतश्चैतन्य	६६
शिक्षके हरिताकारो	६५	स्वदृष्टिप्रतिघातेन	६४
स		**ह**	
सतः सत्त्वविहीनानाम्	४१	हरिकरपुष्करहंस	७

ADDENDA.

पुटः ६५.

शिक्षकेति ॥ शिक्षके शिक्षकसमीपे, हरिताकारो द्विजः शुकः, अपूर्ववर्णवान् भाति अकाराद्यक्षरवान् भाति। मेरौ, नीलतनुः द्विजः काकः, अपूर्ववर्णवान् पूर्ववर्णादन्यवर्णवान् स्वर्णवर्ण इत्यर्थः। सत्यनिष्ठे वसिष्ठे, कौशिकः विश्वामित्रः, अपूर्ववर्णवान् ब्राह्मणवर्णवान्, वर्णशब्दो वर्णत्वपरः न विद्यते यस्मात् पूर्वो वर्णः सोऽपूर्ववर्णः ब्राह्मणवर्णः, ब्राह्मणवर्णाद्धि न पूर्ववर्णोऽस्ति तस्य सर्वपूर्वत्वात्। यद्वा सत्यनिष्ठे गौतमे कौशिकः इन्द्रः, अपूर्ववर्णवान् अवर्णवान् इत्यर्थः। अवर्णम् अधरः परीवादो वा। 'अवर्णाक्षेपनिर्वादपरीवादापवादवत्' इत्यमरः ॥ ५ ॥

पुटः ७६.

यमेनेति ॥ 'अहिंसा सत्यवचनं ब्रह्मचर्यमकल्कता। अस्तेयमिति पञ्चैते यमाश्चैव व्रतानि च।' इति यमशब्दार्थः उक्तः। उपक्रमे ऐश्वर्यारम्भदशायां, यमेनाहिंसनादिना, व्यवस्थितमेकरूपं पुरुषम्, विश्वाधीशं विश्वस्य भूमण्डलस्य अधीशं प्रभुं, जानन् अहिंसादियुक्त एव मण्डलाधिपतिः भविष्यतीति निश्चयवानित्यर्थः। सामादिषु सामदानभेददण्डेषु, तत्त्वज्ञः यथार्थज्ञानवान् च यो भवति। स तादृशः कः सिद्धिं नार्हति। एतादृशः सर्वोऽपि राजा

सिद्धिं इष्टार्थप्राप्तिम् अर्हत्येवेत्यर्थः। अर्थान्तरम्। यं सनकमेकं ब्रह्मकुमारम्, एनोऽपक्रमे पापापगमे जाते व्यवस्थितं वै परमात्मनि अवस्थितम्, विश्वाधीशं च विश्वेषाम् आधीनां मानसव्यथानाम् ईशम् अवश्यं च, अजानन् महर्षयो ज्ञातवन्तः। सामादिषु ऋग्यजुःसामाथर्वणेषु, तत्त्वज्ञः स सनकः सिद्धिमर्हत्येव। 'विः पक्षिपरमात्मनोः' इति भट्टबाणः। 'पुंस्याधिर्मानसी व्यथा' इत्यमरः। अर्थान्तरम्। एनोऽपक्रमे पापापगमे, विश्वाधीशं प्रपञ्चप्रभुं व्यवस्थितं हंसस्थितं च यं ब्रह्माणं जानन् सामादितत्त्वज्ञः पुरुषो भवति, सः कः स ब्रह्मा सिद्धिं प्राप्यताम् अर्हतीति। अर्थान्तरम्। सामादि तत्त्वज्ञः पुरुषः व्यवस्थितं गरुडस्थितं हरिं विश्वाधीशं चराचरपतिं जानन् भवति। 'एको नैकः सवः कः किम्' इति ससंज्ञः स हरिः सिद्धिम् अनवाप्तावाप्तव्यप्राप्तिं नार्हति। 'नानवाप्तमवाप्तव्यम्' इति स्मृतेः॥ ८॥

प्रयुक्तमिति॥ काले मन्त्रिभिः प्रयुक्तं प्रातिकूल्याभिवृद्धेः प्रागेवामात्यैः कृतं, भक्तिभेदात् पुरस्कृतं पूजितं, साम समीचीनवचनं, ज्वलनवक्त्राणामपि क्रोधातिशयेन ज्वलनसदृशमुखानामपि, परं संवननं श्रेष्ठं वशीकरणसाधनं। 'वशक्रिया संवननम्' इत्यमरः। अर्थान्तरम्। काले बहिष्यवमानादिप्रयोगकाले मान्त्रिभिः सामगैः ऋग्यजुःसामानि मन्त्राः तद्विदः मन्त्रिणः 'अहे बुध्न्य मन्त्रं मे गोपाय यमृषयस्त्रैविदा विदुः। ऋचः सामानि यजूंषि। सा हि श्रीरमृता सताम्' इति श्रुतेः। प्रयुक्तं गीतं, भक्तिभेदेन हिङ्काराख्येन भक्तिविशेषेण, पुरस्कृतं पूर्वभागे कृतं हिङ्कारस्य सामानवयवत्वेऽपि 'सप्तभक्तं

सामोपसीत' इति श्रुत्या स्तोत्राङ्गत्वेन च भक्तिशब्दः । प्रस्तावस्य सामावयवत्वेऽपि सामपुरस्कारकत्वं न संभवति, उद्गीथाद्येकदेश-पुरस्कारकत्वात्। ज्वलनवक्त्राणामपि अग्निमुग्वानां देवानामपि, साम-गीतिविशेषः परं संवननमिति । यद्वा भक्तिभेदैः प्रस्तावोद्गीथप्रति-हारोपद्रवनिदानाख्यैः विभागविशेषैः पूजितमिति ॥ ९ ॥

विधाविति ॥ नीत्या जैमिनिमुनिप्रणीतन्यायकलापेन, विधौ शास्त्रार्थे, लब्धधृतिः निर्भयः, क्रियमाणे कर्मण्यन्यथाशङ्का हि दुरि-तोत्पत्तिशङ्काजननद्वारा भीतिमुत्पादयति, न्यायजनितो निर्णयः तां शङ्कां वारयति । विनतानन्दनः आनतानां ऋत्विजां दक्षिणाभिः आनन्दोत्पादकः, द्विजः त्रैवर्णिकः, स्थानेषु नियम्यमानैः भुजङ्गैरपि भूष्यते संज्ञपनविशसनादिषु नियुज्यमानैः कुपितैरपि स्तूयते । अर्था-न्तरम् । नीत्या इष्टदेशप्रापणेन तदर्थमित्यर्थः । विधौ विष्णौ, लब्ध-धृतिः प्राप्तधारणः, विनतानन्दनः द्विजः वैनतेयः पक्षी, स्थानेषु शिरःकर्णभुजवक्षःकटिपादेषु, नियम्यमानैः बध्यमानैः, भुजङ्गैः सर्पैरपि, भूष्यते अलंक्रियते ॥ १० ॥

नीतिरिति ॥ व्यवहारासमर्थस्य कोकिलस्य शैशवे शरीररक्षार्थं काककुलान्तर्भावोऽपेक्षितः । साध्यनिष्पत्त्युत्तरकालं विजातीयसहवासस्य दुःखावहत्वेन सजातीयसहवासस्य हृद्यत्वेन च काककुलबहिर्भावो-ऽपेक्षितः । एतदुभयं काकैरेव घटयतो विधेः साजात्यवैजात्यबुद्ध्यु-त्पादनरूपसामर्थ्यप्रशंसया परैरेव स्वार्थं घटयतः पुरुषविशेषस्य साम-र्थ्यप्रशंसां व्यनक्ति । हे परपुष्ट, कोकिल, यतः नीतेः, त्वं, बलिपुष्ट-कुलैः काककुलैः पुत्रीकृतोऽसि । एष विधिः तव कर्णे यथा पञ्चमम्

उच्चकार उद्गीर्णवान् विभक्तवान्। ततः, काले तस्मिन् काले, परुषैः तैरेव यतो नीतेः दूरीकृतश्वासि। त्वयि धातुः सा नीतिः साजात्य-बैजात्यबुद्धयुत्पादनरूपा परं सती अत्यन्तं श्लाघ्या ॥ ११ ॥

पुटः ८३.

वदान्येति ॥ कदर्यश्च, गृहीतस्थिरलोभतः इदं स्थिरं भूयादिति भावात्, परान् अन्यान्, अर्थैः अयोजयन्, कस्मैचित् किंचित् अददत्, स्वजनानामनर्थहेतून् अर्थान् धनानि, संचिनोति। परेभ्यो-ऽर्थे दत्ते स्वार्थनाशः स्यादिति मत्वा न किंचित् ददाति, प्रत्युत स्व-जनान् बाधते स्वार्थलोभायेति भावः। वदान्यः, गृहीतस्थिरलोभतः गृहीतमिदं स्थिरं मे भूयादिति इच्छया स्वान् अर्थान् आत्मीयधनानि, परानर्थैः परोपद्रवैः, अयोजयन् परोपद्रवे कृते तत्रानुकूलार्थनाशः स्यादिति बुद्धया स्वेनार्थेन परान् अपीडयन्नित्यर्थः। अर्थान् संचिनोति ॥ ९ ॥

अनिःशेषित इति ॥ दातव्यम् अपरेप्सितं तेन च तत्प्रश्नो लक्ष्यते। अनिःशेषितः असमाप्तः दातव्यः ईप्सितप्रश्नो येन तम्। वदान्यमिति वादिनं अन्यदीप्सितं वदेति वादिनं पुरुषम्, अर्थी जनः, सव्रीलः नोपसर्पति व्रीलया आकुला वधूरिव, महत् अस्माकम् ईप्सितं कथमयं दास्यतीति आगमनदशायाम् उत्पन्नाया बुद्धेः सर्वमीप्सितम् दत्त्वा पुनः अन्यत् वद इति प्रश्नेन बाधितत्वात् लज्जा ॥ १० ॥

5/004 - 4

This book is a preservation photocopy.
It was produced on Hammermill Laser Print natural white,
a 60 # book weight acid-free archival paper
which meets the requirements of
ANSI/NISO Z39.48-1992 (permanence of paper)

Preservation photocopying and binding
by
Acme Bookbinding
Charlestown, Massachusetts

1996